- जि. महाबलेश्वर भट्टः

बेङ्गलूरु

संस्कृतभारती

बेङ्गलूरु

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

प्रथमं मुद्रणम् - १९९८ - ५०००
द्वितीयं मुद्रणम् - २००० - ५०००
तृतीयं मुद्रणम् - २००१ - ५०००
चतुर्थं मुद्रणम् - २००४ - ५०००
पञ्चमं मुद्रणम् - २००६ - ५०००
षष्ठं मुद्रणम् - २००८ - ५०००

मूल्यं - रू. १५.००

मुद्रणम् -
वागर्थ
एन्, आर्. कालोनी, बेङ्गलूरु - १९

ISBN 978-81-88220-19-1

SANDHIH - A Study book for **'Sandhi'**, prepared by Sri G. Mahabaleshwara Bhat. Publisher - **SAMSKRITA BHARATI**, 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085.
Ph : 26721052/26722576

Pages - iv + 60 Price - Rs. 15-00 Sixth Print - December - 2008

Printed at **VAGARTHA** N. R. Colony, Bangalore - 560 019

प्रस्तावना

(प्रथममुद्रणस्य)

सन्धिज्ञानम् अन्तरा संस्कृतक्षेत्रे अध्ययनं दुष्करम् एव । पद्ये गद्ये वा पदच्छेदादिकं विना कथं वा अर्थः अवगम्येत ? पदच्छेदः सन्धिज्ञानमूलः ।

'दैनन्दिनव्यवहारे सन्धिं विनापि व्यवहारः कर्तुं शक्यते' इति भासते कदाचित् । किन्तु सन्धिविषये उपेक्षा प्रदर्शिता चेत् निश्चयेन वयम् अपशब्दप्रयोक्तारः स्याम कदाचित् । समासादिषु सन्धिः नित्यः । व्यवहारे वयं सौकर्यानुगुणं समस्तपदानाम् अपि उपयोगं कुर्मः एव । तत्समये सन्धिज्ञानं विना कथं वा व्यवहारनिर्वाहः शक्येत ?

कौमुद्यादिग्रन्थेषु सन्धीनां निरूपणं प्रक्रियासहितम् उपलभ्यते एव । तथापि प्राप्तस्नातकोत्तरपदवीकाः अपि अत्र व्यामोहं प्राप्नुवन्ति क्वचित् । क्वचिच्च प्रक्रियाजालं सन्देहगर्ते पातयति अस्मान् । त्रिपाद्यां विद्यमानानां विसर्गसन्धिसूत्राणां पौर्वापर्यज्ञानं सुलभावगम्यं नास्तीत्यतः विसर्गसन्धिप्रकरणे बहूनां विभ्रमः । अयोगवाह-स्थान-प्रयत्नादिशब्दानां को वा अर्थः इति सन्देहः बाधते बहून् । यतः तादृशानां पदानाम् अर्थः कौमुद्यादीनाम् अध्ययनमात्रेण न अवगम्यते ।

एतादृशान् सर्वान् अंशान् मनसि निधाय संस्कृताध्यापकानां जिज्ञासूनां च उपकाराय एषः 'सन्धि'सङ्ग्रहः आरचितः अस्ति । विस्तृतं विवरणं, शास्त्रीया टिप्पणी, असन्दिग्धः निरूपणक्रमः च एतस्य पुस्तकस्य वैशिष्ट्यम् । एतस्मात् एव एतत् पुस्तकं छात्राणाम् अध्यापकानां च उपकाराय भवेत् ।

परिष्कारार्हान् अंशान् ज्ञापयन्तु इति उपयोक्तृषु निवेदनम् । महत्या आसक्त्या एतत् पुस्तकं सज्जीकृतवते श्रीमते महाबलेश्वरभट्टमहोदयाय, मुखपुटकलाकाराय 'अरसु'वर्याय, मुद्रकाय, अन्येभ्यः सहकारिभ्यः च कृतज्ञतां समर्पयामः वयम् ।

बहुधान्य सं।। मार्गशीर्ष-अमावास्या — प्रकाशकः

१८.१२.१९९८

(षष्ठमुद्रणस्य)

षष्ठं मुद्रणं यत् प्रचलति तत् महते सन्तोषाय । पुस्तकस्य उपयोक्तृभ्यः, मुद्रणालयबन्धुभ्यः, सहकृतवद्भ्यः सर्वेभ्यः च कृतज्ञताः समर्प्यन्ते सादरम् ।

सर्वधारि सं।। मार्गशीर्षपूर्णिमा — प्रकाशकः

१२.१२.२००८

अनुक्रमणिका

इदमत्र ज्ञातव्यम्

॥ श्रीः ॥

श्रीमत्पाणिनि-वररुचि-पतञ्जलिभ्यो नमः ॥

१. अक्षरप्रकरणम्

(अ) अक्षरम्

- **अक्षरम्** - श्रवणेन्द्रियग्राह्यम् अक्षरम् । तच्च कण्ठताल्वाद्यभिघातेन अभिव्यज्यते । अक्षरस्यैव नामान्तरं 'वर्णः' इति ।
- **संस्कृताक्षराणि** - नवपञ्चाशत् (५९)[1]
- **स्वराः** - द्वाविंशतिः (२२) ⟶

ह्रस्वाः	दीर्घाः	प्लुताः
अ	आ	अ३
इ	ई	इ३
उ	ऊ	उ३
ऋ	ॠ	ऋ३
ऌ	-	ऌ३
-	ए	ए३
-	ऐ	ऐ३
-	ओ	ओ३
-	औ	औ३

- **अयोगवाहाः** - चत्वारः (४)
  - ं (अं, इं..) अनुस्वारः ।
  - ः (अः, इः.....) विसर्गः ।
  - ᳵक ᳵख जिह्वामूलीयः ।
  - ᳶप ᳶफ उपध्मानीयः ।
- **व्यञ्जनानि** - त्रयस्त्रिंशत् (२५+८ = ३३)

  i. [2]**वर्गीयव्यञ्जनानि** - पञ्चविंशतिः (२५)

  क ख ग घ ङ (कवर्गः)

  च छ ज झ ञ (चवर्गः)

---

1. 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः' इति पाणिनीयशिक्षानुरोधेन त्रिषष्टिः (६३) चतुःषष्टिः (६४) वा वर्णाः सन्ति । ५९ वर्णैः सह वेदे श्रूयमाणाः चत्वारो यमवर्णाः यदि योज्यन्ते तदा त्रिषष्टिः (६३) । एतैः सह यदि 'ळ'कारोऽपि योज्यते तदा चतुःषष्टिः (६४) वर्णाः भवन्ति । अत्र अक्षरमालायां न ते पञ्च वर्णाः प्रदर्शिताः । अत ५९ वर्णाः इति लिखितम् । 'क्ष ज्ञ' इत्येते न पृथग् अक्षरे । ककारषकारयोर्योगे क्षः, जकारञकारयोः योगे ज्ञः इति ज्ञेयम् ।

ट ठ ड ढ ण (टवर्गः)

त थ द ध न (तवर्गः)

प फ ब भ म (पवर्गः)

ii. **अवर्गीयव्यञ्जनानि** – अष्ट (८)

य र ल व (अन्तःस्थाः)

श ष स ह (ऊष्माणः)

(आ) अक्षराणां विभागः

१. स्वराः २. अयोगवाहाः ३. व्यञ्जनानि चेति अक्षराणि त्रिविधानि भवन्ति ।

१. स्वराः – द्वाविंशतिः (२२)

[3]स्वराः नाम स्वतन्त्रतया स्पष्टम् उच्चार्यमाणाः वर्णाः । [4]स्वराश्च त्रिविधाः – १. ह्रस्वस्वराः २. दीर्घस्वराः ३. प्लुतस्वराश्चेति ।

१.१. ह्रस्वस्वराः

एकमात्राकालेन उच्चार्यमाणाः स्वराः ह्रस्वस्वराः इत्युच्यन्ते । यथा – अ इ उ ऋ ऌ (५) एतावन्तः एव ह्रस्वाः । ए ऐ ओ औ इत्येते संस्कृते दीर्घाः एव । न कदापि ह्रस्वाः ।

१.२. दीर्घस्वराः

द्विमात्रेण कालेन उच्चार्यमाणाः स्वराः दीर्घस्वराः ।

यथा – आ ई ऊ ॠ ए ऐ ओ औ (८) दीर्घः ऌकारः नास्ति ।

१.३. प्लुतस्वराः

त्रिमात्रेण कालेन उच्चार्यमाणाः स्वराः प्लुतस्वराः ।

यथा – अ३ इ३ उ३ ऋ३ ऌ३ ए३ ऐ३ ओ३ औ३ (९)

इत्थम् आहत्य द्वाविंशतिः (२२) स्वराः सन्ति ।

- **स्वराणाम् अन्तर्भेदाः** –

i. पूर्वोक्तानां द्वाविंशतेः (२२) स्वराणाम् एकैकोऽपि १. उदात्तः[5] २. अनुदात्तः[6] ३. स्वरितश्चेति[7] त्रिविधो भवति ।

---

2. वर्गीयव्यञ्जनमिति व्याकरणशास्त्रे व्यवहारः न कृतः । वर्गीयमित्यस्य साधुत्वं विद्वद्भिः चिन्तनीयम् ।
3. स्वयं राजन्ते इति स्वराः । (१.२.३० सूत्रे महाभाष्ये)
4. ऊकालोज्झस्वदीर्घप्लुतः – १.२.२७ उश्च ऊश्च ऊ३श्च वः । वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ।
5. उच्चैरुदात्तः –१.२.२९ ताल्वादिषु सभागेषु ऊर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् ।
6. नीचैरनुदात्तः –१.२.३० ताल्वादिषु सभागेषु अधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् ।
7. समाहारः स्वरितः – १.२.३१ उदात्तानुदात्तत्वे वर्णधर्मौ समाहियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ।

वेदोच्चारणे उदात्तादीनाम् अभिज्ञानं सुकरम् । एतान् उदात्तादीन् वेदपुस्तकेषु इत्थं प्रदर्शयन्ति । यथा -

१. **उदात्तः** - अक्षराणाम् अधस्ताद् उपरिष्टाद् वा कापि रेखा न भवति ।
यथा - अ इ उ...

२. **अनुदात्तः** - अक्षराणाम् अधस्ताद् '_' एषा रेखा भवति । यथा अ॒ इ॒ उ॒...

३. **स्वरितः** - अक्षराणाम् उपरिष्टाद् '।' एषा रेखा भवति ।
यथा - अ॑ इ॑ उ॑

स्पष्टप्रतिपत्तये ऋगेषा प्रदर्श्यते ।

अ॒ग्निमी॑ळे पु॒रोहि॑तम् । य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् ।

ii. द्वाविंशतेः स्वराणाम् एकैकोऽपि उदात्तः, अनुदात्तः, स्वरितश्चेति त्रिविधो भवति इत्युक्तम् । एवञ्च सर्वे स्वराः उदात्ताः, अनुदात्ताः, स्वरिताश्चेति त्रिविधाः भवन्ति इति फलितोऽर्थः । एते त्रिविधाः अपि प्रत्येकम् अनुनासिकाः अननुनासिकाश्चेति द्विविधाः भवन्ति । एवञ्च ह्रस्वः षोढा, दीर्घः षोढा, प्लुतश्च षोढा इति फलितम् ।

१. अनुनासिकाः

[8]मुखसहितनासिकया उच्चार्यमाणवर्णाः अनुनासिकाः ।
यथा - अँ इँ उँ... (ङ् ञ् ण् न् म्)

व्यञ्जनेषु 'ङ् ञ् ण् न् म्' इत्येतानि पञ्च व्यञ्जनानि नित्यम् अनुनासिकाः । यँ लँ वँ(यलव) इत्येतानि त्रीणि व्यञ्जनानि अनुनासिकान्यपि अननुनासिकान्यपि इति विशेषः ।

२. अननुनासिकाः

नासिकां विना कण्ठादिना उच्चार्यमाणाः वर्णाः अननुनासिकाः ।
यथा - अ इ उ .... (क् च्...)

पूर्वोक्तानां स्वरविषयाणाम् एष सङ्ग्रहः ।

अ इ उ ऋ ऌ इत्येते पञ्चैव ह्रस्वस्वराः । संस्कृते 'ए ऐ ओ औ' इत्येते नित्यं दीर्घाः एव, कदापि ह्रस्वाः न । आ ई ऊ ॠ ए ऐ ओ औ इत्येते अष्टावेव दीर्घस्वराः । दीर्घऌकारः नास्ति । अ३ इ३ उ३ ऋ३ ऌ३ ए३ ऐ३ ओ३ औ३ इत्येते नवैव प्लुतस्वराः । इत्थम् आहत्य द्वाविंशतिः स्वराः भवन्ति ।

---

8. मुखनासिकावचनोऽनुनासिकः - १.१.८ मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ।

उदात्तादीनां स्पष्टप्रतिपत्तये ते इत्थं सङ्गृह्य प्रदर्श्यन्ते ।

ह्रस्वस्वराः	*दीर्घस्वराः*	*प्लुतस्वराः*
अ इ उ ऋ ऌ (५)	आ ई ऊ ॠ ए ऐ ओ औ (८)	अ३ इ३ उ३ ऋ३ ऌ३ ए३ ऐ३ ओ३ औ३ (९)
(ह्रस्वभेदाः) उदात्तानुनासिकः उदात्ताननुनासिकः अनुदात्तानुनासिकः अनुदात्ताननुनासिकः स्वरितानुनासिकः स्वरिताननुनासिकः	(दीर्घभेदाः) उदात्तानुनासिकः उदात्तानुनासिकः अनुदात्तानुनासिकः अनुदात्ताननुनासिकः स्वरितानुनासिकः स्वरिताननुनासिकः	(प्लुतभेदाः) उदात्तानुनासिकः उदात्तानुनासिकः अनुदात्तानुनासिकः अनुदात्ताननुनासिकः स्वरितानुनासिकः स्वरिताननुनासिकः

एवञ्च अ इ उ ऋ इत्येतेषां प्रत्येकमष्टादश भेदाः । ऌकारस्य द्वादश । तस्य दीर्घाभावात् । एचाम् अपि द्वादश । तेषां ह्रस्वाभावात् ।

२. [9]अयोगवाहाः - चत्वारः (४)

माहेश्वरसूत्रेषु अनुच्चारिताः अपि प्रयोगं ये निर्वाहयन्ति ते अयोगवाहाः । [10]'अ इ उ ण्' इत्यादीनि चतुर्दश सूत्राणि महेश्वरेण पठितानि । तत्र वक्ष्यमाणाः अनुस्वारादयः नोक्ताः । किन्तु ते प्रयोगे श्रूयन्ते । अतः माहेश्वरसूत्रेषु अयुक्ताः सन्तः (सम्बन्धम् अप्राप्ताः) प्रयोगं निर्वाहयन्तीति अयोगवाहाः इति अन्वर्थं नाम । एते च अयोगवाहाः १. अनुस्वारः २. विसर्गः, ३. जिह्वामूलीयः ४. उपध्मानीयश्चेति चतुर्विधाः सन्ति ।

२.१. अनुस्वारः

स्वरेभ्यः परः एव नासिकया अनुस्वारः उच्चार्यते । अनुस्वारस्य चिह्नं स्वरस्योपरि बिन्दुरूपेण (ं) लिख्यते । यथा - अं इं.... ।

२.२. विसर्गः

स्वरेभ्यः पर एव तत्तत्स्वरस्थानेन विसर्गोऽपि उच्चार्यते । विसर्गस्य चिह्नं स्वरात्परं बिन्दुद्वयरूपेण (:) लिख्यते ।

---

9. न विद्यते योगः (योगः=सम्बन्धः) येषां (माहेश्वरसूत्रेषु) ते अयोगाः । वहन्तीति=वाहाः । अयोगाश्च ते वाहाश्च=अयोगवाहाः ।
10. दशमं (१०) पृष्ठं पश्यन्तु ।

२.३. जिह्वामूलीयः

⨯क ⨯ ख इति कखाभ्यां प्रागर्धविसर्गसदृशः जिह्वामूलीयः ।
यथा - बाल ⨯ करोति । चैत्र ⨯ खनति ।

२.४. उपध्मानीयः

⨯प ⨯ फ इति पफाभ्यां प्रागर्धविसर्गसदृशः उपध्मानीयः ।
यथा - बाल⨯ पिबति । वृक्ष ⨯ फलति ।

एते चत्वारः अयोगवाहाः स्वरत्वेन व्यञ्जनत्वेनापि परिगण्यन्ते ।

३. [11]व्यञ्जनानि

स्वरेण सह[12] व्यञ्जनानि उच्चार्यन्ते । यथा - क च ट तु पे इति । व्यञ्जनानां सुखोच्चारणार्थं स्पष्टप्रतिपत्तये च स्वरेण सह व्यञ्जनस्य (क् + अ = क) उच्चारणम् । अतः 'क च टु तु पे' इत्येवमुच्चारितेऽपि 'क् च् ट् त् प्' इत्येतानि स्वररहितान्येव व्यञ्जनानि इति ज्ञेयम् । तस्मात् 'यकारादेशो भवति', 'वकारादेशो भवति' इत्यादेः 'य्' इत्यादेशः 'व्' इत्यादेशो भवतीत्यर्थः ।

व्यञ्जनानि च - १. वर्गीयव्यञ्जनानि २. अवर्गीयव्यञ्जनानि चेति द्विधा ।

३.१. वर्गीयव्यञ्जनानि (स्पर्शाः) (२५)

ककारादारभ्य मकारान्तं यावत् पञ्चविंशतिः अक्षराणि सन्ति । एतेषु क्रमात् पञ्च गणाः सन्ति । एकैकोऽपि गणः क्रमात् पञ्चाक्षरात्मकः । पञ्चाक्षरात्मकाः पञ्च गणाः एव क्रमाद् कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्गश्चेति व्यवह्रियन्ते । अत एव एतानि वर्गीयव्यञ्जनानि इत्यभिधीयन्ते । वर्गीयव्यञ्जनानामेव नामान्तरं 'स्पर्शः' इति । एते पञ्च वर्गाः क्रमात् कु चु टु तु पु शब्दैरपि व्याकरणशास्त्रे व्यवहृताः । अतः कु = कवर्गः, चु = चवर्गः, टु = टवर्गः, तु = तवर्गः, पु = पवर्गः इति ज्ञेयम् ।

३.२. अवर्गीयव्यञ्जनानि (अन्तःस्थाः + ऊष्माणः च) (८)

य र ल व श ष स ह इत्यष्टौ व्यञ्जनानि पृथक्पृथगेव सन्ति । अतः कमपि वर्गं न प्रविष्टानि । अत एव एतानि अवर्गीयव्यञ्जनानि इत्युच्यन्ते । एतेषु

---

11. अन्वग्भवतीति व्यञ्जनम् । (१.२.३. सूत्रे महाभाष्ये) (अन्वग्भवति=अनुगच्छति अज्गुणम्) कैयटोद्योतयोस्तु - गतिरपि व्यञ्जेरर्थः । विविधम् उदात्तत्वादिनानाप्रकारं, गच्छति अजुपरागवशादिति व्यञ्जनमिति - लिखितम् ।

12. न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति । (१.२.३० सूत्रे महाभाष्ये)

'यरलव' इत्येते चत्वारः 'अन्तःस्थाः' इति, 'शषसह' इत्येते चत्वारः 'ऊष्माणः' इति च व्यवह्रियन्ते ।

इत्थं पञ्चविंशतिः वर्गीयव्यञ्जनानि, अष्टौ अवर्गीयव्यञ्जनानि चेति आहत्य त्रयस्त्रिंशत् (३३) व्यञ्जनानि भवन्ति ।

सन्ध्यादेः नियमानां कथनसौलभ्यार्थं १. मृदुव्यञ्जनानि[13] २. कर्कशव्यञ्जनानि[13] चेत्यपि व्यञ्जनानि विभज्य व्यवह्रियन्ते ।

i. मृदुव्यञ्जनानि (हश्)[14]

एकैकस्यपि वर्गस्य अन्तिमास्त्रयो वर्णाः (गघङ, जझञ, डढण, दधन, बभम) य र ल व ह इति पञ्च वर्णाश्च मृदुव्यञ्जनानि । एते वर्णा एव 'हश्' प्रत्याहारान्तर्गताः भवन्ति । अतः मृदुव्यञ्जनानि नाम 'हश्' प्रत्याहारः एव ।

ii. कर्कशव्यञ्जनानि (खर्)[14]

एकैकस्यपि वर्गस्य आद्यौ द्वौ वर्णौ (कख, चछ, टठ, तथ, पफ) शषस इति त्रयो वर्णाश्च कर्कशव्यञ्जनानि । एते वर्णाः एव 'खर्' प्रत्याहारान्तर्गताः भवन्ति । अतः कर्कशव्यञ्जनानि नाम 'खर्'प्रत्याहारः एव ।

तथा च द्वाविंशतिः (२२) स्वराः, चत्वारः (४) अयोगवाहाः, त्रयस्त्रिंशद् (३३) व्यञ्जनानि चेति आहत्य नवपञ्चाशत् (२२+४+३३=५९) अक्षराणि सन्ति ।

(इ) स्थानानि प्रयत्नाश्च

- **स्थानानि - अष्ट (८)**

वर्णाभिव्यक्तिप्रदेशः स्थानम् । कण्ठः, तालु, मूर्धा, दन्तः, ओष्ठौ, नासिका, जिह्वामूलम्, उरश्चेति अष्टौ स्थानानि । यदा शब्दप्रयोगेच्छा भवति तदा कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति । एवं तत्तत्स्थानेषु अभिव्यक्ताः वर्णाः कण्ठ्यः, तालव्यः इत्येवं शब्दैरपि व्यवह्रियन्ते । वर्णाः, तत्तद्वर्णानां स्थानानि, तत्तत्स्थानोत्पन्नवर्णानां नामानि च इह सङ्गृह्य प्रदर्श्यन्ते । तथाहि -

---

13. अष्टाध्याय्यां मृदुव्यञ्जनानि कर्कशव्यञ्जनानि इति शब्दाभ्यां व्यवहारो न कृतः । कन्नडादिभाषासु अधुनातनैर्व्यवहारः कृतः । एतावपि संस्कृतशब्दावेव इति कृत्वा अत्र उपात्तौ ।

14.. दशमं (१०) पृष्ठं पश्यन्तु ।

15. 'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः' इति पाणिनीयशिक्षानुरोधेन यदि विसर्गः इकारादेः परो भवति तदा विसर्गस्य तत्तत्स्वराणामेव स्थानमिति लघुशब्देन्दुशेखरे उक्तम् ।

वर्णाः	उत्पत्तिस्थानानि	स्थानजन्यवर्णनामानि
अ आ अ३ क ख ग घ ङ ह विसर्गः(:)[15]	कण्ठः	कण्ठ्यः
इ ई इ३ च छ ज झ ञ य श	तालु	तालव्यः
ऋ ॠ ऋ३ ट ठ ड ढ ण र ष	मूर्धा	मूर्धन्यः
ऌ ऌ३ त थ द ध न ल स	दन्ताः	दन्त्यः
उ ऊ उ३ प फ ब भ म उपध्मानीयः (⌓प⌓फ)	ओष्ठौ	ओष्ठ्यः
ङ ञ ण न म	नासिका+कण्ठादिः	अनुनासिकः
ए ऐ	कण्ठतालु	कण्ठतालव्यः
ओ औ	कण्ठोष्ठम्	कण्ठोष्ठ्यः
व	दन्तोष्ठम्	दन्तोष्ठ्यः
जिह्वामूलीयम् (⌓क ⌓ख)	जिह्वामूलम्	जिह्वामूलीयः
अनुस्वारः	नासिका	-
[16]ह्ण [16]ह्न ह्ल ह्र ह्म ह्य ह्ण ह्ल ह्व	उरः	औरस्यः

कण्ठतालु, कण्ठोष्ठं, दन्तोष्ठम् इति त्रीणि न पृथक् स्थानानि । अष्टसु स्थानेष्वेव अन्तर्भूतानि । किन्तु 'ए'कारादयः द्वयोः स्थानयोः उत्पद्यन्ते ।

- **प्रयत्नाः (५+११=१६)**

यदा शब्दप्रयोगेच्छा भवति तदा कायाग्निना नाभिदेशात् प्रेरितः प्राणवायुः उर्ध्वम् आक्रामन् मूर्धपर्यन्तं गत्वा प्रतिनिवर्तते । प्रतिनिवृत्तः स वायुः मुखं प्राप्य कण्ठादिस्थानानि आहत्य वर्णान् अभिव्यनक्ति । ततः स एव वायुः गलविवरविकासादीन् करोति । एवञ्च जिह्वाग्रमध्यमूलैः कण्ठादिस्थानाभिघातार्थं, गलविवरविकासाद्यर्थं च वायोः सहायभूता क्रिया एव 'प्रयत्नः' इत्युच्यते । एष प्रयत्नो द्विधा - १. आभ्यन्तरः २. बाह्यश्चेति ।

१. आभ्यन्तरप्रयत्नः

ओष्ठात्प्रभृति[17] काकलकपर्यन्तम् आस्यमिति व्यवहारः । तत्र स्थितानां स्थानानाम् अभिघातकाः प्रयत्नाः आभ्यन्तराः इत्युच्यते । आस्यान्तर्गतत्वात् एतेषां प्रयत्नानाम् आभ्यन्तरत्वम् । अत एव एते आभ्यन्तरप्रयत्नाः । आभ्यन्तरप्रयत्नश्च पञ्चधा -

---

16. 'ह्ण ह्न' एतौ पदावयवत्वेन किं श्रूयेते ? इति विद्वद्भिः चिन्तनीयम् ।

17. काकलको नाम चुबुकस्य अधस्ताद् ग्रीवायाम् उन्नतप्रदेशः ।

18. सावर्ण्यचिन्तनप्रसङ्गे तु अकारस्य विवृतः एव प्रयत्नः ।

१. स्पृष्टः २. ईषत्पृष्टः ३. ईषद्विवृतः ४. विवृतः ५. संवृतश्चेति । केषां वर्णानां के प्रयत्नाः इति इह प्रदर्श्यन्ते । यथा –

आभ्यन्तरप्रयत्नाः	स्पृष्टः	ईषत्स्पृष्टः	ईषद्विवृतः	विवृतः	संवृतः
वर्णाः	वर्गीयव्यञ्जनानि (स्पर्शाः)	य र ल व (अन्तःस्था)	श ष स ह (ऊष्माणः)	स्वराः (अचः)	अ (प्रयोगे एव)[18]

इदमवधेयम् –

येषाम् अक्षराणां स्थानानि आभ्यन्तरप्रयत्नाश्च समानाः तानि सवर्णानि इत्युच्यन्ते । यथा – इ ई इ३ इत्येतेषां स्थानं तालु, आभ्यन्तरप्रयत्नश्च विवृतः इति तानि परस्परं सवर्णानि भवन्ति ।[19]

२. बाह्यप्रयत्नः

ओष्ठात्प्रभृति काकलकपर्यन्तम् आस्यम् इति उच्यते इत्युक्तम् । काकलकाधस्तात् गलविवरविकासादिकराः बाह्यप्रयत्नाः । आस्याद्बहिर्भूतत्वात् एतेषां बाह्यत्वेन व्यवहारः । बाह्यप्रयत्नाश्च एकादशधा – १. विवारः, २. संवारः, ३. श्वासः, ४. नादः, ५. घोषः, ६. अघोषः, ७. अल्पप्राणः, ८. महाप्राणः, ९. उदात्तः, १०. अनुदात्तः, ११. स्वरितः चेति ।

एतेषु बाह्यप्रयत्नेषु अन्तिमास्त्रयः प्रयत्नाः केवलं स्वरसम्बद्धाः । ते च पूर्वम् उक्ताः । अवशिष्टाः अष्टौ प्रयत्नाः व्यञ्जनसम्बद्धाः । केषां व्यञ्जनानां के प्रयत्नाः इति इह प्रदर्श्यते । यथा –

बाह्यप्रयत्नाः	*वर्णाः*
विवारः, श्वासः, अघोषः	क ख, चछ, टठ, तथ, पफ, श ष स [कर्कशव्यञ्जनानि (खर्)]
संवारः, नादः, घोषः	गघङ, जझञ, डढण, दधन, बभम, य र ल व ह [मृदुव्यञ्जनानि (हश्)]

19. सर्वेषां स्वराणां स्वस्वभेदैः ह्रस्वदीर्घप्लुतैः सह परस्परं सावर्ण्यं भवति । अकारस्य इकारस्य, इकारस्य उकारस्य वा परस्परं सावर्ण्यं न भवति । सर्वेषां विजातीयानां स्वराणां स्थानभेदात् । वर्गीयव्यञ्जनेषु स्वस्ववर्गवर्णैः सह परस्परं सावर्ण्यं भवति । यथा – क ख ग घ ङ इत्येतेषां परस्परं सावर्ण्यमस्ति – इति फलितोऽर्थः ।
ऋ ऌ वर्णयोः स्थानभेदे सत्यपि परस्परं सावर्ण्यमस्ति । 'ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति वार्तिकम् अत्र प्रमाणम् ।

अल्पप्राणः	कगङ, चजञ, जडण, तदन, पबम, यरलव [वर्गाणां प्रथमतृतीयपञ्चमाः अन्तःस्थाश्च (यणः)]
महाप्राणः	खघ, छझ, ठढ, थध, फभ, शषसह [वर्गाणां द्वितीयचतुर्थौ, ऊष्माणश्च (शल्)]

पूर्वप्रदर्शितेषु कोष्टकेषु निर्दिष्टानाम्
एष मथितार्थः -

कर्कशव्यञ्जनानां ('खर्'वर्णानाम्) विवारः श्वासः अघोषश्चेति त्रयः प्रयत्नाः । मृदुव्यञ्जनानां ('हश्'वर्णानाम्) संवारः, नादः, घोषश्चेति त्रयः प्रयत्नाः । पुनरपि वर्गाणां प्रथम-तृतीयपञ्चमानां यरलवानाञ्च अल्पप्राणः । वर्गाणां द्वितीयचतुर्थयोः शषसहां च महाप्राणः । अतः एकैकस्यापि व्यञ्जनस्य सम्बन्धिनः चत्वारो बाह्यप्रयत्नाः भवन्ति । यथा -

'क'कारस्य - १. विवारः २. श्वासः ३. अघोषः ४. अल्पप्राणः
'ख'कारस्य - १. विवारः २. श्वासः ३. अघोषः ४. महाप्राणः
'ज'कारस्य - १. संवारः २. नादः ३. घोषः ४. अल्पप्राणः
'झ'कारस्य - १. संवारः २. नादः ३. घोषः ४. महाप्राणः

एष सङ्ग्रहः

'स्थानानि प्रयत्नाश्च' इति विभागे प्रदर्शितानाम् एष संक्षेपः । एतानि वाक्यानि[20] कण्ठगतानि यदि भवन्ति तर्हि वर्णानां स्थानप्रयत्नविवेकः सुकरः । तथाहि -

१. स्थानानि -

अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकानुस्वारस्य । पञ्चमवर्णैर्यणा वा युक्तस्य हकारस्य उरः ।

२. प्रयत्नाः -

प्रयत्नो द्विधा - आभ्यन्तरो बाह्यश्च ।

i. आभ्यन्तरः पञ्चधा - स्पृष्टेषत्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम् ।

---

20. कौमुद्याः पङ्क्तयः एव प्रायोऽत्र लिखिताः ।

ii. बाह्यप्रयत्नस्त्वेकादशधा -

विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्त अनुदात्तः स्वरितश्चेति । तत्र खरो विवारश्वासाः अघोषाश्च । हशः संवारनादाः घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमाः यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः[21] ।

(ई) माहेश्वरसूत्राणि

यानि चतुर्दश सूत्राणि आश्रित्य समस्तं व्याकरणं प्रवृत्तं, तानि 'अक्षरसमाम्नाय' इति शब्देन व्यवह्रियन्ते । महेश्वराद् इमानि चतुर्दश सूत्राणि समधिगतानि इति कृत्वा तानि माहेश्वरसूत्राणि इति लोके प्रसिद्धिं गतानि ।

इमानि च तानि चतुर्दश माहेश्वरसूत्राणि -

१. अइउण्	**२. ऋऌक्**	**३. एओङ्**
४. ऐऔच्	**५. हयवरट्**	**६. लण्**
७. ञमङणनम्	**८. झभञ्**	**९. घढधष्**
१०. जबगडदश्	**११. खफछठथचटतव्**	**१२. कपय्**
१३. शषसर्	**१४. हल्**	

एतेषु चतुर्दशसु सूत्रेष्वपि स्वररहितम् एकैकं व्यञ्जनम् अन्ते श्रूयते । एतादृशेन अन्तिमवर्णेन सह आदिमवर्णः यदि उच्चार्यते तर्हि तदन्तिमं व्यञ्जनं विहाय सर्वे वर्णाः गृहीताः भवन्ति । यथा - 'अइउण्' इति सूत्रस्थः 'अ'कारः 'ऐऔच्' इति सूत्रस्थेन अन्तिमव्यञ्जनेन 'च'कारेण सह यद्युच्चार्यते तदा अच् इति श्रूयते । तदा 'अच्' इति पदात् 'अ इ उ ऋ ऌ ए ओ ऐ औ' इति वर्णाः उपस्थिताः भवन्ति । एवम् उपसंहृत्य व्यवहृतः शब्दः 'प्रत्याहारः' इति शब्देन व्याकरणे प्रथितः । स्पष्टप्रतिपत्तये केचन प्रत्याहाराः विवृत्य प्रदर्श्यन्ते । तथाहि -

अक् - अ इ उ ऋ ऌ
यण् - य् व् र् ल्
जश् - ज् ब् ग् ड् द्
चर् - च् ट् त् क् प् श् ष् स्
अच् - सर्वे स्वराः
हल् - सर्वाणि व्यञ्जनानि

---

21. पाणिनीयशिक्षायाम् अक्षराणि, तेषां भेदाः, अक्षराणां स्थानानि, प्रयत्नाश्चेत्येवमादयः विषयाः उक्ताः । अक्षराणाम् उच्चारणप्रक्रियापि दर्शिता । अहो ! भाषाविषये अस्मदीयानां सूक्ष्मेक्षिका !!

प्रत्याहारे द्वयमिदं स्मरणीयम् -

१. सूत्राणामन्ते विद्यमानानां स्वररहितानां व्यञ्जनानां ग्रहणं न भवति । यथा - अक् । अत्र अ इ उ ऋ ऌ इत्येतेषां ग्रहणं भवति, न तु णकारककारयोर्ग्रहणम् ।

२. आदिमः वर्णो नाम सूत्रेषु आदिमत्वेन श्रूयमाणः एव वर्णः इति न नियमः । अस्माभिः आदिमत्वेन विवक्षितः इति ज्ञेयम् ।
यथा - इक्, यण्, रल्, चर्...

* * * * *

२. सन्धिप्रकरणम्

(अ) सन्धयः

वर्णानाम् अतिशयितः सन्निधिः सन्धिः । एकस्य वर्णस्य उच्चारणानन्तरम् अपरस्य वर्णस्य उच्चारणम्, ततः तृतीयस्य, ततः चतुर्थस्य इत्येवं क्रमेण शब्दोच्चारणं भवति । द्वयोः वर्णयोः उच्चारणयोः मध्ये अर्धमात्राकालात् अपि अधिककालेन व्यवधानं यथा न भवेत् (द्वयोः वर्णयोः उच्चारणयोः मध्ये अर्धमात्राकालः सह्यते इत्यर्थः) तथा उच्चारणमेव सन्धिः । एवं सन्धौ सति कदाचिद् वर्णस्य आदेशादिकं भवति । इत्थम् आदेशादिकम् एव सन्धिकार्यम् इत्युच्यते । इदं च सन्धिकार्यं पदस्य मध्ये पदयोर्मध्ये वा सम्भवेत् ।

यथा - १. हरे + ए = हरये । २. इति + अपि = इत्यपि

अत्र आद्ये पदस्य मध्ये, द्वितीये पदयोर्मध्ये सन्धिकार्यं प्रवृत्तम् । लोके तु सन्धिकार्यमित्यर्थे सन्धिरिति व्यवहारः क्रियते । अतः सन्धिप्रकरणमित्यस्य सन्धिकार्यप्रकरणमित्यर्थः । यण्सन्धिरित्यस्य यण्रूपसन्धिकार्यमित्यर्थः । इत्थञ्च सन्धिप्रकरणे सन्धिशब्दः सन्धिकार्यपरः इति ज्ञेयम् । आदेशादिकं चतुर्धा सम्भवति - १. आदेशरूपेण २. आगमरूपेण ३. लोपरूपेण ४. प्रकृतिभावरूपेण ।

१. आदेशः

'योऽभूत्वा भवति सः आदेशः' इति भाष्यकारेण उक्तम् । पूर्वस्थितम् अक्षरं निरस्य नूतनस्य अक्षरस्य उदयः एव आदेशः । अतः एव **शत्रुवदादेशः** इति वृद्धाः व्यवहरन्ति । अयमादेशः पूर्वस्य स्थाने परस्य वा स्थाने स्यात्, पूर्वपरयोः स्थानेऽपि स्यात् । पूर्वपरयोः स्थाने प्रवर्तमानः आदेशः 'एकादेशः' इति शब्देन व्यवह्रियते ।

यथा - १. यदि + अपि = यद्यपि । अत्र इकारस्य स्थाने यकारादेशः ।

२. गण + ईशः = गणेशः । अत्र पूर्वपरयोः अकारेकायोः स्थाने (अ + इ) एकाररूपः एकादेशः ।

२. आगमः

स्थितस्य वर्णस्य पार्श्वेऽपूर्वतया अपरस्य वर्णस्य उत्पत्तिः आगमः ।

मित्रवद् आगमः इति फलितार्थः ।

यथा - पठन् + अस्ति = पठन्नस्ति । अत्र अकारात्पूर्वं अपूर्वः (नूतनः) अपरो नकारः उत्पन्नः ।

३. लोपः

वर्णस्य अदर्शनं लोपः ।

यथा - १. उभाव् + अपि = उभा अपि । अत्र वकारस्य लोपः ।

४. प्रकृतिभावः

निमित्ते सत्यपि आदेशाभावो विधीयते । सः एव प्रकृतिभावः ।

यथा - हरी + एतौ = हरी एतौ । अत्र यणो निमित्तस्य सद्भावेऽपि यण् न प्रवृत्तः । यणभावोऽत्रास्ति ।

(आ) सन्धिभेदाः

सन्धयस्त्रिविधाः[1] - १. स्वर(अच्)सन्धिः २. व्यञ्जन(हल्)सन्धिः ३. विसर्गसन्धिश्चेति ।

१. स्वरसन्धिः - स्वरस्य स्थाने आदेशः स्वरसन्धिः ।

यथा -

अनु + एषणम् = अन्वेषणम् । अत्र उकारस्य स्थाने आदेशः ।

२. व्यञ्जनसन्धिः - व्यञ्जनस्य स्थाने आदेशः, लोपः, व्यञ्जननिमित्तकागमश्च-व्यञ्जनसन्धिः ।

यथा -

जगत् + ईशः = जगदीशः - अत्र तकारस्य स्थाने आदेशः ।

उभाव् + अपि = उभा अपि - अत्र वकारस्य लोपः ।

पचन् + अस्ति = पचन्नस्ति – अत्र व्यञ्जननिमित्तकः आगमः ।

३. विसर्गसन्धिः - विसर्गस्य स्थाने आदेशः [2]लोपश्च विसर्गसन्धिः ।

यथा -

बालः + तत्र = बालस्तत्र - अत्र विसर्गस्य स्थाने आदेशः ।

वृक्षाः + अत्र = वृक्षा अत्र - अत्र विसर्गस्य लोपः ।

प्रकृतिभावः स्वरसन्धौ, स्वादिसन्धिः विसर्गसन्धौ च अन्तर्भावितः अत्र इति ज्ञेयम् ।

---

1. वैयाकरणाः सन्धीन् पञ्चभिः प्रकारैः विभजन्ते । अच्सन्धिः, प्रकृतिभावः, व्यञ्जनसन्धिः, विसर्गसन्धिः, स्वादिसन्धिश्चेति । पुस्तकेऽस्मिन् बोधनसौकर्याय 'त्रिविधाः सन्धयः' इति विभागो दर्शितः । अयं पाणिनीयपरिधावेवेति ज्ञेयम् ।
2. अष्टाध्याय्यां साक्षात् विसर्गस्य लोपो न विहितः । अस्मिन् पुस्तके बोधनसौकर्याय विसर्गस्य लोपरूपः उपायोऽप्याश्रितः । न तावता पाणिनीयेन विरोधः । लक्ष्यस्य उभयथापि सिद्धेः । अतोऽस्मिन् पुस्तके क्वचिदुपायान्तराश्रयणं पाणिनीयपरिधावेव इति ज्ञेयम् ।

३. स्वरसन्धयः

स्वरसन्धयोऽष्टविधाः । तथा हि -

१.	यण्सन्धिः	एतयोः द्वयोः सन्ध्योः पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति ।
२.	यान्तवान्तादेशसन्धिः	
३.	गुणसन्धिः	पञ्चस्वपि एतेषु सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशो भवति ।
४.	वृद्धिसन्धिः	
५.	सवर्णदीर्घसन्धिः	
६.	पूर्वरूपसन्धिः	
७.	पररूपसन्धिः	
८.	प्रकृतिभावः -	अत्र आदेशाभावः ।

*यण् = य् व् र् ल्

इई	उऊ	ऋॠ	ऌ
य्	व्	र्	ल्

+ असवर्णस्वरः

[3] इ ई उ ऊ ऋ ॠ ऌ इत्येतेभ्यो वर्णेभ्योऽसवर्णे स्वरे परे 'इ ई' इत्यनयोः स्थाने यकारः, उ ऊ इत्यनयोः स्थाने वकारः, ऋॠ इत्यनयोः स्थाने रकारः (रेफः), ऌकारस्य स्थाने लकारश्च आदेशो भवति । यथा -

i. इ / ई + (असवर्णस्वरः) = य्

१. प्रति + एकम्
प्रत् + य् + एकम् = प्रत्येकम् । (इ = य्)

२. नदी + अत्र
नद् + य् + अत्र = नद्यत्र । (ई = य्)

---

* 'यण्' इति प्रत्याहारः । (१० पृष्ठं पश्यन्तु)

3. इको यणचि - ६.१.७७ इकः स्थाने यण् स्यादचि संहितायां विषये । इको यण् स्यादसवर्णेऽचि परे इति सूत्रस्य फलितोऽर्थः इति ज्ञेयम् ।

विशेषः

१. वधू + ङस् + आगमन + स् = षष्ठी, कृत्तद्धितसमासाश्च
वधू + आगमन = सुपो धातुप्रातिपदिकयोः
वध् + व् + आगमन = इको यणचि
वध्वागमन + स् = स्वौजसमौट् ...
वध्वागमन + अम् = अतोऽम्
वध्वागमनम् = अमि पूर्वः

वध् + ङस् + आगमन + स् = इत्यवस्थायां षष्ठीसमासे प्रातिपदिकसंज्ञायां सुप्प्रत्यययोर्लोपे यण्सन्धौ समुदायात् सुप्रत्यये, अमादेशे, पूर्वरूपे च वध्वागमनम् इति सिद्धं भवति । एषः 'वध्वागमनम्' इत्यस्य समस्तस्य पदस्य प्रक्रियाक्रमः । एतासु प्रक्रियासु यण्सन्धिरपि प्रविष्टः । स च यण् वधू + आगमन इत्यवस्थायां प्रवर्तते, न तु वधू + आगमनम् इत्यवस्थायाम् । सन्धिप्रवृत्त्यनन्तरमेव सुबुत्पत्तेः । समासे सर्वत्र एषा एव सरणिः शास्त्रीया ।

२. गो + य = गोपयसोर्यत्
ग् + अव् + य = एचोऽयवायावः
गव्य + स् = स्वौजसमौट् .....
गव्य + अम् = अतोऽम्
गव्यम् = अमि पूर्वः ।

गो इति प्रातिपदिकात् 'य'प्रत्यये अवादेशे, सुप्रत्यये, अमादेशे, पूर्वरूपे च गव्यम् इति रूपं भवति । अत्रापि गो + य इत्यवस्थायां अवादेशः प्रवर्तते, न तु गो + यम् इत्यवस्थायाम् । सन्धिप्रवृत्त्यनन्तरमेव सुबुत्पत्तेः । प्रत्यये परे सर्वत्र एषा एव शास्त्रीया सरणिः । किन्तु ग्रन्थेऽस्मिन् एषा सरणिः न आश्रिता ।

अतः वधू + आगमनम् इत्यवस्थायां यणादेशः इति, गो यम् इत्यवस्थायाम् अवादेशः इति च निरूपणं कृतम् ।

इत्थमेव ग्रन्थेऽस्मिन् सर्वत्र निरूपितम् । तत्र तु कारणं - प्रायः अध्यापन-परिपाटी एव । बालमनोरमादिव्याख्यानेऽपि क्रमोऽयं क्वचित् दृश्यते ।

ii. **उ / ऊ + (असवर्णस्वरः) = व्**

१. मनु + अन्तरम्
मन् + व् + अन्तरम् = मन्वन्तरम् । (उ = व्)

२. वधू + आगमनम्
वध् + व् + आगमनम् = वध्वागमनम् । (ऊ = व्)

iii. | ऋ / ॠ[4] + (असवर्णस्वरः) = र् |

१. पितृ + इच्छा
पित् + र् + इच्छा = पित्रिच्छा । (ऋ = र्)

iv. | ऌ + (असवर्णस्वरः) = ल् |

१. घस्ऌ + आदेशः
घस् + ल् + आदेशः = घस्लादेशः । (ऌ = ल्)

अन्यान्युदाहरणानि -

यदि + अपि = यद्यपि ।	इति + अपि = इत्यपि ।
सुधी + उपास्यः = सुध्युपास्यः ।	मधु + अरिः = मध्वरिः ।
धातृ + अंशः = धात्रंशः ।	ऌ + आकृतिः = लाकृतिः ।
पितृ + अंशः = पित्रंशः ।	जननी + आह = जनन्याह ।
वधू + आसनम् = वध्वासनम् ।	अति + उत्तमः = अत्युत्तमः ।
इति + आचरन्ति = इत्याचरन्ति ।	प्रति + अवदत् = प्रत्यवदत् ।
इति + आक्षिप्तः = इत्याक्षिप्तः ।	वस्त्राणि + उत्पादयति = वस्त्राण्युत्पादयति ।
साधु + इदम् = साध्विदम् ।	
स्मरामि + अहम् = स्मराम्यहम् ।	भवतु + अधुना = भवत्वधुना ।
इति + आधुनिकः = इत्याधुनिकः ।	पार्वती + अधुना = पार्वत्यधुना ।
नास्ति + असाध्यम् = नास्त्यसाध्यम् ।	व्यसनेषु + असक्तम् = व्यसनेष्वसक्तम् ।

२. यान्तवान्तादेशसन्धिः

यान्तौ वान्तौ च = अय् आय् अव् आव्

२.१.

ए	ऐ	ओ	औ
अय्	आय्	अव्	आव्

+ स्वरः

[5]'ए ऐ ओ औ' इत्येतेभ्यो वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय्, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशो भवति ।

4. ॠकारात्परः असवर्णस्वरः दुर्लभः । तादृशोदाहरणस्य विरलत्वात् । कॄ + इति = क्रिति इत्युदाहरणं कथञ्चिद्देयम् । 'कॄ' इति कश्चन धातुः ।

5. एचोऽयवायावः - ६.१.७८ एचः क्रमाद् अय् अव् आय् आव् एते स्युरचि ।

i. | ए + (स्वरः) = अय् |

- हरे + ए

  हर् + अय् + ए = हरये । (ए = अय्)

- हरे + आगच्छ

  हर् + अय् + आगच्छ = *हरयागच्छ । (ए = अय्)

ii. | ऐ + (स्वरः) = आय् |

- नै + अकः

  न् + आय् + अकः = नायकः । (ऐ = आय्)

- तस्यै + इदम्

  तस्य् + आय् + इदम् = *तस्यायिदम् । (ऐ = आय्)

iii. | ओ + (स्वरः) = अव् |

- विष्णो + ए

  विष्ण् + अव् + ए = विष्णवे । (ओ = अव्)

- गुरो + आदिश

  गुर् + अव् + आदिश = *गुरावादिश । (ओ = अव्)

iv. | औ + (स्वरः) = आव् |

- पौ + अकः

  प् + आव् + अकः = पावकः । (औ = आव्)

- बालकौ + आगतौ

  बालक् + आव् + आगतौ = *बालकावागतौ । (औ = आव्)

अन्यान्युदाहरणानि -

फले + इच्छा = फलयिच्छा / फल इच्छा
कटे + उपवेशनम् = कटयुपवेशनम् / कट उपवेशनम्
जने + उत्कण्ठा = जनयुत्कण्ठा / जन उत्कण्ठा
वदने + औषधम् = वदनयौषधम् / वदन औषधम्
तस्मै + एतत् = तस्मायेतत् / तस्मा एतत्
तस्यै + ओदनम् = तस्यायोदनम् / तस्या ओदनम्
वै + इह = वायिह / वा इह
द्विषावहै + आर्तिम् = द्विषवहायार्तिम् / द्विषावहा आर्तिम्

करौ + एतौ = करावेतौ / करा एतौ
तौ + एकदा = तावेकदा / ता एकदा
बालौ + ओजस्विनौ = बालावोजस्विनौ / बाला ओजस्विनौ
नरौ + उदारौ = नरावुदारौ / नरा उदारौ
भानो + इह = भानविह / भान इह
गुरो + उत्साहः = गुरवुत्साहः / गुर उत्साहः

२.२.

ओ	औ
अव्	आव्

\+ यादिप्रत्ययः

[6]यकारादिप्रत्यये परे ओ औ इत्येतयोः स्थाने क्रमाद् अव् आव् एतौ आदेशौ भवतः ।

i. ओ + (यादिप्रत्ययः) = अव्

गो + यम्
ग् + अव् + यम् = गव्यम् (ओ = अव्)

ii. औ + (यादिप्रत्ययः)

नौ + यम्
न् + आव् + यम् = नाव्यम् । (औ = आव्)

इदमवधेयम्

स्वरसन्धिषु यण्सन्धौ यान्तवान्तादेशसन्धौ च एकस्य (पूर्वस्थितस्य) वर्णस्य स्थाने आदेशो भवति । इदं सन्धिद्वयं विहाय अन्यत्र स्वरसन्धिषु पूर्वपरयोः स्थाने एकादेशो भवति ।

विशेषः - i. [7]पदान्ते* विद्यमानानाम् 'ए ऐ ओ औ' इत्येतेषां वर्णानां क्रमाद् अय् आय् अव् आव् एते आदेशाः यदा भवन्ति तदा यकारस्य वकारस्य च विकल्पेन लोपो भवति । लोपे कृते पुनः सन्धिः न करणीयः ।

१. हरे + आगच्छ = हरयागच्छ / हर आगच्छ । (सवर्णदीर्घः न)

---

6. वान्तो यि प्रत्यये - ६.१.७९ यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः । 'गव्यूतिः' इत्यत्र 'अध्वपरिमाणे च' इति वार्तिकेन अवादेशः । ओयते, औयत इत्यादौ 'धातोस्तन्निमित्तस्यैव' (६.१.८०) इति नियमात् न अवावौ भवतः ।
7. लोपः शाकल्यस्य - ८.३.१९ अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे । पूर्वत्रासिद्धम् - ८.२.१ इति लोपशास्त्रस्य असिद्धत्वात् न स्वरसन्धिः ।

२. तस्यै + इदम् = तस्यायिदम् / तस्या इदम् । (गुणसन्धिः न)
३. गुरो + आदिश = गुरवादिश / गुर आदिश । (सवर्णदीर्घः न)
४. बालकौ + आगतौ = बालकावागतौ / बालका आगतौ । (सवर्णदीर्घः न)

ii. पदान्तादेकाराद् ओकाराच्च अकारे परे पूर्वरूपं* भवति ।
यथा - हरे + अव = हरेऽव
विष्णो + अव = विष्णोऽव

३. गुणसन्धिः

[8]गुणः = ए ओ अर् अल्

अ/आ + इ/ई	अ/आ + उ/ऊ	अ/आ + ऋ/ॠ	अ/आ + ऌ
ए	ओ	अर्	अल्

[9]अ आ इत्येताभ्यां वर्णाभ्याम् इ ई [10] इत्येतयोः परयोः एकारः, उ ऊ इत्येतयोः परयोः ओकारः, ऋॠ इत्येतयोः परयोः अर्, ऌकारे परे अल् च पूर्वपरयोः स्थाने एकादेशो भवति ।

i. अ/आ + इ/ई = ए

- देव + इन्द्रः
  देव् + ए + न्द्रः = देवेन्द्रः । (अ + इ = ए)
- गण + ईशः
  गण् + ए + शः = गणेशः । (अ + ई = ए)
- महा + इन्द्रः
  मह् + ए + न्द्रः = महेन्द्रः । (आ + इ = ए)
- महा + ईशः
  मह् + ए + शः = महेशः । (आ + ई = ए)

---

8. अदेङ्गुणः - १.१.२ अत् एङ् च गुणसंज्ञः स्यात् ।
9. आद् गुणः - ६.१.८७ अवर्णादचि परे पूर्वपरयोरेको गुणः आदेशः स्यात्संहितायाम् । अवर्णादिकि परे इति सूत्रस्य फलितोऽर्थः इति ज्ञेयम् ।
10. प्लुते इकारे (इ३) परेऽपि गुणो भवति । एवं प्लुते उकारे अपि । किन्तु तादृशस्य लक्ष्यस्य अत्यन्तं दुर्लभत्वात् निमित्तकोटौ न तौ उपात्तौ । अतः पूर्वरूपसन्धिं विहाय अन्ये सन्धयः प्रवर्तन्ते यदि परस्थाने प्लुतः श्रूयेत इति सर्वेषु स्वरसन्धिषु ज्ञेयम् ।

* पूर्वरूपसन्धिं २५ पृष्ठे पश्यन्तु ।

ii. **अ/आ + उ/ऊ = ओ**

- सूर्य + उदयः
  सूर्य् + ओ + दयः = सूर्योदयः । (अ + उ = ओ)
- एक + ऊनविंशतिः
  एक् + ओ + नविंशतिः = एकोनविंशतिः । (अ + ऊ = ओ)
- महा + उत्सवः
  मह् + ओ + त्सवः = महोत्सवः । (आ + उ = ओ)
- महा + ऊर्मिः
  मह् + ओ + र्मिः = महोर्मिः । (आ + ऊ = ओ)

iii. **अ/आ + ऋ/ॠ[11] = अर्**

- सप्त + ऋषयः
  सप्त् + अर् + षयः = सप्तर्षयः । (अ + ऋ = अर्)
- महा + ऋषिः
  मह् + अर् + षिः = महर्षिः । (आ + ऋ = अर्)

iv. **अ/आ + ऌ = अल्**

- तव + ऌकारः
  तव् + अल् + कारः = तवल्कारः । (अ + ऌ = अल्)
- महा + ऌकारः
  मह् + अल् + कारः = महल्कारः । (आ + ऌ = अल्)

अन्यान्युदाहरणानि –

उप + इन्द्रः = उपेन्द्रः	राम + इति = रामेति
परम + ईश्वरः = परमेश्वरः	च + इति = चेति
महा + ईश्वरः = महेश्वरः	न + उन्नतः = नोन्नतः
रमा + ईशः = रमेशः	हित + उपदेशः = हितोपदेशः
गुण + उपेतम् = गुणोपेतम्	गङ्गा + उदकम् = गङ्गोदकम्
सुलभ + उपायः = सुलभोपायः	राजा + ऋषिः = राजर्षिः
सप्त + ऋषयः = सप्तर्षयः	ब्रह्म + ऋषिः = ब्रह्मर्षिः
कृष्ण + ऋद्धिः = कृष्णर्द्धिः	प्रश्न + उत्तरम् = प्रश्नोत्तरम्
परम + उत्कृष्टम् = परमोत्कृष्टम्	पर + उपकारः = परोपकारः

11. अकाराद् आकाराद्वा परः ॠकारः दुर्लभः । सप्त + ॠकाराः = सप्तर्कारा इत्यादि कल्पनीयम् ।

पुरुष + उत्तमः = पुरुषोत्तमः
धीर + उद्धतः = धीरोद्धतः
जिह्वा + इति = जिह्वेति
देव + ऋषिः = देवर्षिः

प्राचीना + उक्तिः = प्राचीनोक्तिः
परिचयस्य + उद्देशः = परिचयस्योद्देशः
न + इच्छति = नेच्छति
महा + उद्देशः = महोद्देशः

४ वृद्धिसन्धिः [12]वृद्धिः = ऐ, औ, आर्, आल्

४.१.

अ/आ + ए/ऐ	अ/आ + ओ/औ
ऐ	औ

[13]'अ आ' इत्येताभ्यां वर्णाभ्याम् 'ए ऐ' इत्येतयोः परयोः 'ऐ'कारः, 'ओ औ' इत्येतयोः परयोः 'औकारः' च, पूर्वपरयोः स्थाने एकादेशो भवति[14]।

i. **अ/आ + ए/ऐ = ऐ**

- एक + एकम्
  एक् + ऐ + कम् = एकैकम् । (अ + ए = ऐ)
- तव + ऐश्वर्यम्
  तव् + ऐ + श्वर्यम् = तवैश्वर्यम् । (अ + ऐ = ऐ)
- सदा + एव
  सद् + ऐ + व = सदैव । (आ + ए = ऐ)
- महा + ऐश्वर्यम्
  मह् + ऐ + श्वर्यम् = महैश्वर्यम् । (आ + ए = ऐ)

ii. **अ/आ + ओ/औ = औ**

- तस्य + ओदनः
  तस्य् + औ + दनः = तस्यौदनः । (अ + ओ = औ)
- मम + औषधम्
  मम् + औ + षधम् = ममौषधम् । (अ + औ = औ)
- गङ्गा + ओघः
  गङ्ग् + औ + घः = गङ्गौघः । (आ + ओ = औ)

---

12. वृद्धिरादैच् - १.१.१. आदैच्च वृद्धिसंज्ञः स्यात् ।
13. वृद्धिरेचि - ६.१.८८ आदेचि परे वृद्धिरेकादेशः स्यात् ।
14. पररूपसन्धौ 'अस्यापवादः' इत्यारभ्य लिखिताः पङ्क्तीः पश्यन्तु । (२७ पृष्ठे)

- महा + औत्सुक्यम्

  मह् + औ + त्सुक्यम् = महौत्सुक्यम् । (आ + औ = औ)

अन्यान्युदाहरणानि -

कृष्ण + एकत्वम् = कृष्णैकत्वम् देव + ऐश्वर्यम् = देवैश्वर्यम्

वन + औषधम् = वनौषधम्	द्वितीया + एकवचनम् = द्वितीयैकवचनम्
अद्य + एव = अद्यैव	दिव्य + औषधम् = दिव्यौषधम्
न + एव = नैव	कृष्ण + औत्कण्ठ्यम् = कृष्णौत्कण्ठ्यम्
तत्र + एव = तत्रैव	तत्र + एकदा = तत्रैकदा
तव + औदार्यम् = तवौदार्यम्	तथा + एव = तथैव
मा + एवम् = मैवम्	परम + औचित्यम् = परमौचित्यम्
यदा + एव = यदैव	दृष्ट्वा + एतत् = दृष्ट्वैतत्
राष्ट्र + ऐक्यम् = राष्ट्रैक्यम्	देवता + एकात्म्यम् = देवतैकात्म्यम्
परम + औदार्यम् = परमौदार्यम्	रक्ता + ओषधी = रक्तौषधी

४.२.

[15]अ/आ + ऋ	[15]ए/ऐ + ऌ
आर्	आल्

[16]अकारान्ताद् आकारान्ताद्वा उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः स्थाने आर् इत्यादेशो भवति । [17]ऋकारादौ ऌकारादौ सुब्धातौ परे तु विकल्पेन ।

i.

अ + ऋ = आर्	अ + ऌ = आल्

- उप + ऋच्छति

  उप् + आर् + च्छति = *उपार्च्छति । (अ + ऋ = आर्)

- प्र + ऋषभीयति

  प्र् + आर् + षभीयति = प्रार्षभीयति । (अ + ऋ = आर्)

  (प्रर्षभीयति - वृद्ध्यभावे गुणः)

---

15. आकारान्तादुपसर्गात्परः ऋकारादिः ऌकारादिश्च धातुः दुर्लभः ।
16. उपसर्गादृति धातौ - ६.१.९१ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् ।
17. वा सुप्यापिशलेः - ६.१.९२ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशो वा स्यात् ।

* प्रैषः, प्रैष्यः इत्येतद्द्वयं विहाय उपार्च्छति इत्यारभ्य सुखार्तः इत्यन्तं यावद् गुणः प्राप्तः । गुणापवादत्वेन वृद्धिर्विहिता । प्रैषः प्रैष्यः इत्यत्र तु पररूपं प्राप्तम् । तस्यापवादत्वेन वृद्धिर्विहिता । एषः एष्यः इत्यनयोः धातुनिष्पन्नत्वात् पररूपं प्राप्तम् ।

18. 'अक्षादूहिन्यामुपसंख्यानम्' (वा) - अक्षशब्दाद् ऊहिनीशब्दे परे वृद्धिरेकादेशः स्यात् ।

- उप + ऌकारीयति

उप् + आल् + कारीयति = उपाल्कारीयति । (अ + ऌ = आल्)

(उपल्कारीयति - वृद्ध्यभावे गुणः)

विशेषः

i. अधोनिर्दिष्टेषु पूर्वपरयोः स्थाने वृद्धिः भवति -

[18]अक्ष + ऊहिनी = अक्षौहिणी । [19]स्व + ईरः = स्वैरः ।

स्व + ईरिन् = स्वैरी । स्व + ईरिणी = स्वैरिणी ।

[20]प्र + ऊहः = प्रौहः । प्र + ऊढः = प्रौढः ।

प्र + ऊढिः = प्रौढिः । प्र + एषः = प्रैषः ।

प्र + एष्यः = प्रैष्यः । [21]प्र + ऋणम् = प्रार्णम् ।

वत्सतर + ऋणम् = वत्सतरार्णम् । कम्बल + ऋणम् = कम्बलार्णम् ।

वसन + ऋणम् = वसनार्णम् । दश + ऋणः = दशार्णः ।

ऋण + ऋणम् = ऋणार्णम् । दशार्णा (नदी)

ii. [22]'अ आ' इत्येताभ्यां ऋतशब्दे परे पूर्वपरयोः स्थाने आर् आदेशो भवति, एष आदेशः तृतीयासमासे एव । यथा - सुख + ऋतः = सुखार्तः । अत्र सुखेन ऋतः इति विग्रहः । परम + ऋतः = परमर्तः इत्यत्र तु परमश्चासौ ऋतश्चेति विग्रहः । अतोऽत्र गुण एव, न वृद्धिः ।

५. सवर्णदीर्घसन्धिः

सवर्णदीर्घाः = आ ई ऊ ॠ

अ आ	इ ई	उ ऊ	ऋ
आ	ई	ऊ	ॠ

+ सवर्णस्वरः

[23]'अ आ' इत्येताभ्याम् 'अ आ' इत्येतयोः परयोः आकारः, 'इ ई' इत्येताभ्याम्

---

19. 'स्वादीरेरिणोः' (वा) - स्वशब्दाद् ईरशब्दे ईरिन्शब्दे च परे वृद्धिरेकादेशः स्यात् ।
20. 'प्रादूहोढोढ्येषैष्येषु' (वा) - प्र इत्युपसर्गाद् ऊह, ऊढ, ऊढि, एष, एष्य इत्येतेषु परेषु वृद्धिरेकादेशः स्यात् ।
21. 'प्रवत्सतरकम्बलवसनदशार्णानामृणे' (वा) - प्र, वत्सतर, कम्बल, वसन, दश, ऋण इत्येतेभ्यः ऋणशब्दे परे वृद्धिरेकादेशः स्यात् ।
22. 'ऋते च तृतीयासमासे' (वा) - तृतीयासमासे अकाराद् ऋतशब्दे परे वृद्धिरेकादेशः स्यात् ।
23. अकः सवर्णे दीर्घः - ६.१.१०१ अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् ।

'इ ई' इत्येतयोः परयोः ईकारः, 'उ ऊ' इत्येताभ्याम् 'उ ऊ' इत्येतयोः परयोः ऊकारः, 'ऋ' इत्यस्मात् 'ऋ ऌ' इत्येतयोः परयोः ॠकारः, पूर्वपरयोः स्थाने एकादेशो भवति ।

१. **अ/आ + अ/आ = आ**

- परम + अर्थः
  परम् + आ + र्थः = परमार्थः । (अ + अ = आ)
- देव + आलयः
  देव् + आ + लयः = देवालयः । (अ + आ = आ)
- विद्या + अभ्यासः
  विद्य् + आ + भ्यासः = विद्याभ्यासः । (आ + अ = आ)
- विद्या + आलयः
  विद्य् + आ + लयः = विद्यालयः । (आ + आ = आ)

२. **इ/ई + इ/ई = ई**

- कवि + इन्द्रः
  कव् + ई + न्द्रः = कवीन्द्रः । (इ + इ = ई)
- कवि + ईश्वरः
  कव् + ई + श्वरः = कवीश्वरः (इ + ई = ई)
- पृथिवी + इन्दुः
  पृथिव् + ई + न्दुः = पृथिवीन्दुः । (ई + इ = ई)
- मही + ईशः
  मह् + ई + शः = महीशः । (ई + ई = ई)

३. **उ/ऊ + उ/ऊ = ऊ**

- भानु + उदयः
  भान् + ऊ + दयः = भानूदयः । (उ + उ = ऊ)
- साधु + ऊचुः
  साध् + ऊ + चु = साधूचुः । (उ + ऊ = ऊ)
- वधू + उत्साहः
  वध् + ऊ + त्साहः = वधूत्साहः । (ऊ + उ = ऊ)
- वधू + ऊर्मिका
  वध् + ऊ + र्मिका = वधूर्मिका । (ऊ + ऊ = ऊ)

---

24. सवर्णे परे पूर्वत्र ॠकारस्य ॡकारस्य वा प्रसक्तिः दुर्लभा । नास्त्येव वा । तथैव ॠकारात्परः ॠकारोऽपि दुर्लभः । कॄ + ॠकारः इत्येवमादिकं तु कल्पनामात्रमेव ।

४. | ऋ + ऋ/ऌ = ॠ |

- पितृ + ऋणम्

  पित् + ॠ + णम् = पितॄणम् (ऋ + ऋ = ॠ)

- होतृ + ऌकारः

  होत् + ॠ + कारः = होतॄकारः । (ऋ + ऌ = ॠ)

अन्यान्युदाहरणानि -

अल्प + अपराधः = अल्पापराधः
विद्या + अभ्यासः = विद्याभ्यासः
मुनि + इन्द्रः = मुनीन्द्रः
श्री + ईशः = श्रीशः
गुरु + ऊधः = गुरूधः
होतृ + ऋकारः = होतॄकारः
मधुर + अक्षरम् = मधुराक्षरम्
दैत्य + अरिः = दैत्यारिः
अस्ति + इदम् = अस्तीदम्
दर्भ + आसनम् = दर्भासनम्

रस + आस्वादः = रसास्वादः
विद्या + आलयः = विद्यालयः
कवि + ईश्वरः = कवीश्वरः
गुरु + उपदेशः = गुरूपदेशः
पितृ + ऋणम् = पितॄणम्
न + अन्यथा = नान्यथा
तस्य + आत्मजः = तस्यात्मजः
विद्या + आतुरः = विद्यातुरः
दशमी + इति = दशमीति
अद्य + अपि = अद्यापि

पूर्वरूपम् = ए ओ

ए	ओ
ए	ओ

+ | अ |

[25]पदान्ताद् एकाराद् अकारे परे एकारः, पदान्ताद् ओकाराद् अकारे परे ओकारः च पूर्वपरयोः स्थाने एकादेशो भवति ।

i. | ए + अ = ए |

अन्ते + अपि

अन्त् + ए + पि = अन्तेऽ*पि । (ए + अ = ए)

ii. | ओ + अ = ओ |

सो + अयम्

स् + ओ + यम् = सोऽयम् । (ओ + अ = ओ)

---

25. एङः पदान्तादति - ६.१.१०९ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् ।

* 'ऽ' इदं चिह्नं स्पष्टप्रतिपत्तये लिख्यते । पाणिनिना तु न विहितम् ।

अन्यान्युदाहरणानि -

ते + अत्र = तेऽत्र	सो + अवदत् = सोऽवदत्
को + अपि = कोऽपि	गृहे + अहम् = गृहेऽहम्
मात्रे + अर्पितम् = मात्रेऽर्पितम्	रामो + अहसत् = रामोऽहसत्
हरे + अव = हरेऽव	मृगो + अस्ति = मृगोऽस्ति
गोविन्दो + अतिथिः = गोविन्दोऽतिथिः	मार्गे + अन्यः = मार्गेऽन्यः
दीर्घे + अहनि = दीर्घेऽहनि	मे + अन्तिके = मेऽन्तिके
सुन्दरे + अम्बरे = सुन्दरेऽम्बरे	रमे + अम्बिके = रमेऽम्बिके

इदमवधेयम्

i. यान्तवान्तादेशसन्धेः अयम् अपवादः ।

ii. [26]समासे गोशब्दात् ह्रस्वाकारे परे प्रकृतिभावः, पूर्वरूपम्, 'अव' इत्यादेशः च भवति, अकारं विहाय अन्येषु स्वरेषु परेषु ओकारस्य अव इति, अव् इति च आदेशो भवति । यथा -

- गो + अग्रम् = गो अग्रम्/गोऽग्रम्/गवाग्रम् ।
  गो + अजिनम् = गो अजिनम्/गोऽजिनम्/गवाजिनम् ।
- गो + उष्ट्रम् = गवोष्ट्रम्/गवुष्ट्रम् ।
- गो + ओदनम् = गवौदनम्/गवोदनम्

  गवाक्षः, गवेन्द्रः इत्यत्र तु नित्यम् अवादेशो भवति ।

७.१.

अ	ए
ए	ओ

\+ ओ

[27]अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे 'एकारः', ओकारादौ धातौ परे 'ओकारः' पूर्वपरयोः स्थाने एकादेशो भवति । वृद्धेरयम् अपवादः ।

i. अ + ए = ए

प्र + एजते

प्र् + ए + जते = प्रेजते । (अ + ए = ए)

---

26. सर्वत्र विभाषा गोः - ६.१.१२२ लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते । अवङ् स्फोटायनस्य - ६.१.१२३ अचि परे पदान्ते गोरवङ् वा स्यात् । इन्द्रे च - ६.१.१२४ गोरवङ् स्यादिन्द्रे ।
27. एङि पररूपम् - ६.१.९४ अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् ।

ii. | अ + ओ = ओ |

उप + ओषति

उप् + ओ + षति = उपोषति । (अ + ओ = ओ)

अस्यापवादः -

[28]एकारादौ इण्धातौ एध्धातौ च परे पररूपं न । किन्तु वृद्धिरेव (ऐकारादौ तु पररूपप्राप्तिरेव नास्ति । अतो वृद्धिः स्वयं सिद्धा) यथा -

उप + एति = उपैति

प्र + एधते = प्रैधते ।

विशेषः - i. पूर्वोक्तनिमित्ताभावेऽपि वक्ष्यमाणेषु पररूपं प्रवर्तते इति ज्ञेयम् ।

१. [29]शक + अन्धुः = शकन्धुः । २. कर्क + अन्धुः = कर्कन्धुः (अन्धुः = कूपः) ३. कुल + अटा = कुलटा । ४. हल + ईषा = हलीषा । लाङ्गल + ईषा = लाङ्गलीषा । ६. मार्त + अण्डः = मार्तण्डः । [30]सीमा + अन्तः = सीमन्तः । केशवेशे इत्यर्थे एव पररूपम् । सीमान्तः इत्यत्र तु सवर्णदीर्घः । मनस् + ईषा = मनीषा (अस् + ई = ई) पतत् + अञ्जलिः = पतञ्जलिः (अत् + अ = अ)

ii. [31]अवर्णान्तात् ओतुशब्दे ओष्ठशब्दे च परे पररूपं विकल्पेन भवति समासे एव । यथा -

स्थूल + ओतुः = स्थूलोतुः/स्थूलौतुः

बिम्ब + ओष्ठः = बिम्बोष्ठः/बिम्बौष्ठः

| ७.२. | अ/आ + ओम् आ(ङ्) |

[32]अकारान्ताद् आकारान्ताद्वा शब्दाद् ओम् इति परे ओकारः, आ(ङ्) इति परे तु (आङ् इत्युपसर्ग एव भवेत् ।) (आ + इ = ए) एकारः (आ + उ = ओ) ओकारः वा, पूर्वपरयोः स्थाने एकादेशः स्यात् । अयमपि वृद्धेरपवादः ।

i. | अ/आ + ओम् = ओ(म्) |

- शिवाय + ओं नमः

---

28. एत्येधत्यूठ्सु - ६.१.८९ अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् ।
29. शकन्ध्वादिषु पररूपं वाच्यम् (वा) ।
30. सीमन्तः केशवेशे (वा)
31. ओत्वोष्ट्योः समासे (वा) ।
32. ओमाङोश्च - ६.१.९५ ओमि आङि च आत्परे पररूपमेकादेशः स्यात् ।

शिवाय् + ओं + नमः = शिवायों नमः । [अ + ओ(पु) = ओ(पु)]

- का + ओमिति वदति

  क् + ओ + मिति वदति = कोमिति वदति । [(आ + ओ(पु) = ओ(पु)]

ii. अ/आ + आ(ङ्) = ए/ओ

- शिव + आ + इहि

  शिव + (ए + हि =) एहि - गुणसन्धिः

  शिव + एहि (अत्र एकारे [33]आङ्त्वमस्तीति विभावनीयम्)

  शिव् + ए + हि = शिवेहि । [अ + ए (आङ्) = ए]

- सदा + आ + इहि

  सदा + (ए + हि =) एहि (गुणः)

  सदा + एहि ([33]आङ्त्वमस्ति)

  सद् + ए + हि = सदेहि । [आ + ए (आङ्) = ए]

- अद्य + आ + ऊढा

  अद्य + (ओ + ढा =) ओढा (गुणः)

  अद्य + ओढा ([33]आङ्त्वमस्ति)

  अद्य + ओ + ढा = अद्योढा [अ + ओ(आङ्) = ओ]

- कदा + आ + ऊढा

  कदा + (ओ + ढा =) ओढा (गुणः)

  कदा + ओढा ([33]आङ्त्वमस्ति)

  कद् + ओ + ढा = कदोढा । [आ + ओ (आङ्) = ओ]

८. प्रकृतिभावः

निमित्ते सत्यपि सन्धिकार्याभावः प्रकृतिभावः । स्वभावेन अवस्थितिः प्रकृतिभावः इत्यर्थः । प्रकृत्या = स्वभावेन, भावः = अवस्थितिः । यथा - हरी एतौ इत्यत्र यणो निमित्तस्य सद्भावेऽपि यण् न प्रवर्तते ।

८.१. i. [34]पदान्ते विद्यमानानाम् अ आ इ ई उ ऊ ऋ इत्येतेषाम् (अकः) ऋकारे परे प्रकृतिभावो विकल्पेन भवति, प्रकृतिभावपक्षे सति दीर्घस्वरे स ह्रस्वो भवति । समासेऽपि प्रकृतिभावोऽयं प्रवर्तते ।

ii. [35]पदस्यान्ते विद्यमानस्य इकः असवर्णेऽचि परे यणादेशः विकल्पेन भवति ।

---

33. अन्तादिवच्च - ६.१.८५ योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत्स्यात् ।
34. ऋत्यकः - ६.१.१२८ पदान्ताद् अकः ऋति परे प्रकृत्या स्युः, ह्रस्वश्च वा । समासेऽपि अयं प्रकृतिभावः ।
35. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च - ६.१.१२७ पदान्ताद् इकोऽसवर्णेऽचि परे प्रकृत्या स्युः ह्रस्वश्च वा । न समासे ।

यणभावे प्रकृतिभावः, सति दीर्घे स ह्रस्वश्च भवति । समासे तु नायं प्रकृतिभावः ।

i. - राजा + ऋषिः । (इमे भिन्ने पदे)
राज + ऋषिः = राज ऋषिः ।
राजर्षिः । (गुणसन्धिः)
- राज + ऋषिः = राज ऋषिः । (इदं समस्तं पदम्)
राजर्षिः । (गुणः)
- वसन्त + ऋतुः = वसन्तऋतुः (स. प.)
वसन्तर्तुः (गुण)
- वर्षा + ऋतुः
वर्ष + ऋतुः = वर्षऋतुः (स. प.)
वर्षर्तुः । (गुणः)
- दधि + ऋते = दधि ऋते
दध्यृते । (यण्)
- स्त्री + ऋणम्
स्त्रि + ऋणम् = स्त्रि ऋणम् (स. प.)
स्त्यृणम् । (यण्)
- गुरु + ऋणम् = गुरुऋणम् (स. प.)
गुर्वृणम् । (यण्)
- वधू + ऋणम्
वधु + ऋणम् = वधुऋणम् (स. प.)
वध्वृणम् । (यण्)
- पितृ + ऋणम् = पितृ ऋणम् (स. प.)
पितृणम् । (सवर्णदीर्घः)

ii. - दधि + अत्र = दधि अत्र
दध्यत्र । (यण्)
- चक्री + अत्र
चक्रि + अत्र = चक्रि अत्र
चक्र्यत्र (यण्)

---

36. प्लुतप्रगृह्या अचि नित्यम् - ६.१.१२५ प्लुताः प्रगृह्याश्च अचि परे नित्यं प्रकृत्या स्युः ।
37. दूराद्धूते च - ८.२.८४ दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् ।

८.२. प्लुतप्रकृतिभावः ।

[36]प्लुतस्य स्वरे परे नित्यं प्रकृतिभावो भवति । प्लुतः कुत्र प्रयोक्तव्यः इति शास्त्रेणैव ज्ञातव्यम् । प्लुतविधायकानि सूत्राणि बहूनि सन्ति । तेषु एकस्यैवार्थोऽत्र दीयते । तथाहि -

[37]दूरात्सम्बोधने यद्वाक्यं तस्य वाक्यस्य अन्तिमः स्वरः (व्यञ्जनान्तं चेत् व्यञ्जनात्पूर्वस्थितः) प्लुतो भवति । वाक्यस्यान्ते यत्र सम्बोधनं भवति तत्रैव अयं प्लुतः । प्लुतः वाक्यसम्बन्धीति स्मरणीयम् ।

- आगच्छकृष्ण३ + अत्र गौश्चरति = आगच्छकृष्ण३ अत्र गौश्चरति ।
- गच्छ गौरि३ + असौ तत्रास्ति = गच्छ गौरि३ असौ तत्रास्ति ।
- तिष्ठ वधु३ + एषाप्यागच्छति = तिष्ठ वधु३ एषाप्यागच्छति ।
- शृणु हरे३ + अत्रेयं गोपी = शृणु हरे३ अत्रेयं गोपी ।
- पश्य गुरो३ + एष मां ताडयति = पश्य गुरो३ एष मां ताडयति ।

८.३. प्रगृह्यप्रकृतिभावः ।

प्रगृह्यस्य स्वरे परे नित्यं प्रकृतिभावो भवति ।

प्रगृह्यं नाम काचन संज्ञा । इदं च प्रगृह्यं कुत्र प्रवर्तते इति शास्त्रेणैव ज्ञातव्यम् । केषाञ्चनसूत्राणामर्थः सङ्गृह्यते । तथाहि -

i. [38]ईकारान्तं ऊकारान्तं एकारान्तं च द्विवचनं प्रगृह्यं भवति ।

ii. [39]'अमी' इत्यस्य ईकारः प्रगृह्यः भवति ।

iii. [40]ओकारान्तम् अव्ययम्, आ[41] इत्यव्ययञ्च (आङ् इति, आ इति द्वे स्तः, तयोर्मध्ये 'आ' इत्यव्ययमेव) प्रगृह्यं भवति ।

- कवी + एतौ = कवी एतौ । (नात्र यण् ।)
- गुरू + इमौ = गुरू इमौ । (नात्र यण् ।)
- लते + एते = लते एते । (नात्र यान्तादेशः ।)
- पचेते + इमौ = पचेते इमौ । (नात्र यान्तादेशः ।)
- अमी + आश्रमाः = अमी आश्रमाः । (नात्र यण् ।)
- अहो + अत्रभवान् = अहो अत्र भवान् । (नात्र पूर्वरूपम् ।)
- आ + एवं नु मन्यसे = आ एवं नु मन्यसे । (नात्र वृद्धिः ।)

स्वरसन्धिसङ्ग्रहार्थं ४९ तमं पृष्ठं पश्यन्तु ।

38. ईदूदेद्द्विवचनं प्रगृह्यम् - १.१.११ ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् ।
39. अदसोमात् - ११.१२ अस्यात्परावीदूतौ प्रगृह्यौ स्तः ।
40. ओत् - १.१.१५ ओदन्तो निपातः प्रगृह्यः स्यात् ।
41. निपात एकाजनाङ् - १.१.१४ एकोऽज् निपातः आङ्वर्ज्यः प्रगृह्यः स्यात् ।

४. व्यञ्जनसन्धिः

[1]श्चुः - श् च् छ् ज् झ् ञ् ।

[2]सकारस्य शकारचवर्गाभ्यां योगे[3] सकारस्य शकारः, तवर्गस्य शकारचवर्गाभ्यां योगे तवर्गस्य क्रमात् चवर्गः आदेशो भवति ।

i. | स् + (श्/चवर्गः) = श् |

- शिशुस् + शेते
  शिशु + श् + शेते = शिशुश्शेते । (स् = श्)
- मनस् + चञ्चलम्
  मन + श् + चञ्चलम् = मनश्चञ्चलम् (स् = श्)
- रामस् + छात्रः
  राम + श् + छात्रः = रामश्छात्रः । (स् = श्)

ii. | तवर्गः + (श/चवर्गः) = चवर्गः |

- भगवत् + शक्तिः
  भगव + च् + शक्तिः = भगवच्शक्तिः । (त् = च्)
- सत् + चित्
  स + च् + चित् = सच्चित् । (त् = च्)
- सुहृद् + जगाम
  सुहृ + ज् + जगाम = सुहृज्जगाम । (द् = ज्)
- हे गुणिन् + जानातु
  हे गुणि + ञ् + जानातु = हे गुणिञ्जानातु । (न् = ञ्)

iii. | चवर्गः + तवर्गः = चवर्गः |

- यज् + नः
  यज् + ञ् + अः = यज्ञः । (न् = ञ्)

---

1. चु = चवर्गः । अक्षरप्रकरणे पञ्चमं पृष्ठं पश्यन्तु ।
2. स्तोश्चुना श्चुः - ८.४.४० सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः ।
3. योगः = सम्बन्धः । अतः सकारतवर्गाभ्यां परौ एव शकारचवर्गौ भवेतामिति न नियमः । चवर्गात्परोऽपि तवर्गः स्यात् । ष्टुत्वसन्धावपि एवमेव अवधेयम् । एवञ्च श्चुत्वसन्धौ ष्टुत्वसन्धौ च एताभ्याम् एतयोः परयोरिति न चिन्तनीयम् । किन्तु द्वयोः सम्बन्धः । सम्बन्धः पूर्वत्र स्थितेऽपि भवति, परत्र स्थितेऽपि ।

- याच् + ना
  याच् + ञ् + आ = याच्ञा । (न् = ञ्)

विशेषः

सत् + चित् → सद् + चित् → सज् + चित् → सच् + चित् = सच्चित् । सद् + चित् इति जश्त्वे, सज् + चित् इति श्चुत्वे, सच् + चित् इति चर्त्वे च कृते सच्चित् इति सिद्धं भवति । एषः शास्त्रीयः क्रमः । सत् + चित् = सच्चित् इति श्चुत्वे कृते अपि फले भेदः न भवति । अतः सत् + चित् इति विभज्य अत्र प्रदर्शितम् । उत्तरत्रापि हल्सन्धिषु अस्माभिः विभज्य प्रदर्शितस्य, शास्त्रीयक्रमेण विभजनीयस्य च सूक्ष्मः भेदः सम्भवति । किन्तु सन्धौ कृते फलभेदो नास्तीति सौलभ्याय एषा सरणिः आदृता ।

अन्यान्युदाहरणानि -

हरिस् + शेते = हरिश्शेते
सत् + चिद्रूपम् = सच्चिद्रूपम्
गुणिन् + जयः = गुणिञ्जयः
बृहत् + छत्रम् = बृहच्छत्रम्
अन्यत् + च = अन्यच्च
तपस् + चर्या = तपश्चर्या
मृत् + शकटिका = मृच्शकटिका
उद् + जीवनम् = उज्जीवनम्
तत् + चिन्त्यम् = तच्चिन्त्यम्
एतद् + ज्ञात्वा = एतज्ज्ञात्वा

रामस् + च = रामश्च
तद् + ज्वलति = तज्ज्वलति
उद् + ज्वलम् = उज्ज्वलम्
तत् + च = तच्च
शार्ङ्गिन् + जय = शार्ङ्गिञ्जय
कियत् + चिरम् = कियच्चिरम्
सकृत् + चर्वणम् = सकृच्चर्वणम्
भूभृत् + चलति = भूभृच्चलति
बृहत् + छिद्रम् = बृहच्छिद्रम्
प्रतिपत् + चन्द्रः = प्रतिपच्चन्द्रः

अपवादः - [4]शकारात्परस्य चुत्वं न भवति । यथा -
विश् + नः = विश्नः । प्रश् + नः = प्रश्नः ।

२ ष्टुत्वसन्धिः ष्टु = ष् ट् ठ् ड् ढ् ण्

[5]सकारस्य षकारटवर्गाभ्यां योगे सकारस्य षकारः, तवर्गस्य षकारटवर्गाभ्यां योगे तवर्गस्य क्रमात् चवर्गः आदेशो भवति ।

i. | स् + (ष/टवर्गः) = ष् |

- बालस् + षष्ठः
  बाल + ष् + षष्ठः = बालष्षष्ठः । (स् = ष्)

4. शात् - ८.४.४४ शात्परस्य तवर्गस्य चुत्वं न स्यात् ।
5. ष्टुना ष्टुः - ८.४.४१ स्तोः ष्टुना योगे ष्टुः स्यात् ।

- टवर्गस् + टादिः
  टवर्ग + ष् + टादिः = टवर्गष्टादिः । (स् = ष्)
- धनुस्+ ठङ्कारः
  धनु + ष् + ठङ्कार = धनुष्ठङ्कारः (स् = ष्)

ii. तवर्गः + (टवर्गः) = टवर्गः

- बृहत् + टीका
  बृह + ट् + टीका = बृहट्टीका । (त् = ट्)
- तद् + डमरुः
  त + ड् + डमरुः = तड्डमरुः । (द् = ड्)
- एतद् + ढक्का
  एत + ड् + ढक्का = एतड्ढक्का । (द् = ड्)
- चक्रिन् + ढौकसे
  चक्रि + ण् + ढौकसे = चक्रिण्ढौकसे । (न् = ण्)

iii. (ष) + तवर्गः = टवर्गः

- आकृष् + तः
  आकृष् + ट् + अः = आकृष्टः । (त् = ट्)
- इष् + तः
  इष् + ट् + अः = इष्टः । (त् = ट्)

iv. (टवर्गः) + तवर्गः = टवर्गः

- षण् + नाम्
  षण् + ण् + आम् = षण्णाम् (न् = ण्)
- षण् + नवतिः
  षण् + ण् + नवतिः = षण्णवतिः । (न् = ण्)
- षण् + नगर्यः
  षण् + ण् + नगर्यः = षण्णगर्यः (न = ण्)

अन्यान्युदाहरणानि -

तत् + टीका = तट्टीका
शरद् + डम्बरः = शरड्डम्बरः
उत् + टङ्कनम् = उट्टङ्कनम्
पक्षिन् + टिट्टिभ ! = पक्षिण्टिट्टिभ !

बहद् + डिण्डिमः = बृहड्डिण्डिमः
कतमस् + टकारः = कतमष्टकारः
सत् + टिप्पणी = सट्टिप्पणी
उद् + डयनम् = उड्डयनम्

स्याद् + ढक्का = स्याड्ढक्का　　　　पतद् + डिम्भः = पतड्डिम्भः

मरुद् + डिण्डिमः = मरुड्डिण्डिमः　　　　असकृद् + डयनम् = असकृड्डयनम्

बृहत् + टङ्कशाला = बृहट्टङ्कशाला　　　　भयकृद् + डामरः = भयकृड्डामरः

अपवादः - i. [6]तवर्गस्य षकारे ष्टुत्वं न भवति ।

यथा - भवान् + षष्ठः = भवान् षष्ठः । अत्र नकारस्य णकारादेशो न ।

ii. [7]नाम्-नवति-नगरीन् वर्जयित्वा पदान्तात् टवर्गात्परस्य सकारस्य तवर्गस्य च ष्टुत्वं न भवति । यथा -

षट् + सन्तः = षट्सन्तः । अत्र सकारस्य षकारादेशो न ।

षट् + तरुणाः = षट् तरुणाः । अत्र तकारस्य टकारादेशो न ।

मधुलिड् + दीनः = मधुलिड्दीनः । अत्र दकारस्य डकारादेशो न ।

३ जश्त्वसन्धिः जश् = ज् ब् ग् ड् द्

[8]अमङणनान् वर्जयित्वा पदान्ते स्थितानां वर्गीयव्यञ्जनानां,[9] स्वरे मृदुव्यञ्जने च (हशि) परे तत्तद्वर्गीयतृतीयव्यञ्जनम् आदेशो भवति । अवसाने तु तत्तद्वर्गीयं [10]प्रथमं तृतीयं वा व्यञ्जनम् आदेशो भवति । षकारस्यापि डकारो भवति, अवसाने तु टकारो डकारो वा ।

i. | वर्गीयव्यञ्जनानि + (स्वरः) = जश् |

- वाक् + ईशः
  वा + ग् + ईशः = वागीशः । (क् = ग्)
- अच् + अन्तः
  अ + ज् + अन्तः = अजन्तः । (च् = ज्)
- मधुलिट् + अस्ति
  मधुलि + ड् + अस्ति = मधुलिडस्ति । (ट् = ड्)

---

6. तोः षि - ८.४.४३ तवर्गस्य षकारे परे न ष्टुत्वम् ।
7. न पदान्ताट्टोरनाम् - ८.४.४२ पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् ।
8. झलां जशोऽन्ते - ८.२.३९ पदान्ते झलां जशः स्युः ।
9. झल्प्रत्याहारे श स ह् इति वर्णाः अपि प्रविष्टाः । उपर्युक्तनियमे एते वर्णाः नान्तर्भूताः । कुतः ? पदान्ते स्थितस्य शकारस्य सकारस्य हकारसय च क्रमात् षकारस्य रुकारस्य ढकारस्य च 'व्रश्च...' इति, 'ससजुषोरुः' इति, 'होढः' इति च सूत्रैः विधानात् साक्षात् जश्त्वप्रसक्तिः नास्ति । अतः ते वर्णाः नियमे त्यक्ताः । प्रत्याहारघटकाः सर्वे वर्णाः यदि नियमे न स्युः तदा इत्थम् एव चिन्तितम् इति विभावनीयम् ।
10. वाऽवसाने - ८.४.५६ अवसाने झलां चरो वा स्युः ।

- जगत् + ईशः

  जग + द् + ईशः = जगदीशः । (त् = द्)
- सुप् + अन्तम्

  सु + ब् + अन्तम् = सुबन्त । (प् = ब्)

ii. **वर्गीयव्यञ्जनानि + [मृदुव्यञ्जनम्(हश्)] = जश्**

- वाक् + व्यवहारः

  वा + ग् + व्यवहारः = वाग्व्यवहारः ।
- अच् + वर्णः

  अ + ज् + वर्णः = अज्वर्णः । (च् = ज्)
- मधुलिट् + डयते

  मधुलि + ड् + डयते = मधुलिड्डयते । (ट् = ड्)
- महत् + यशः

  मह + द् + यशः = महद्यशः । (त् = द्)
- सुप् + विभक्तिः
- सु + ब् + विभक्तिः = सुब्विभक्तिः । (प् = ब्)

iii. **वर्गीयव्यञ्जनानि = जश्**

वाक् / वाग्

अच् / अज्

लिट् / लिड्

मरुत् / मरुद्

ककुप् / ककुब्

iv. **ष् = ड्**

- षष् + भ्याम्

  ष + ड् + भ्याम् = षड्भ्याम् । (ष् = ड्)

अन्यान्युदाहरणानि -

वाक् + देवता = वाग्देवता

उत् + गमः = उद्गमः

तत् + यथा = तद्यथा

षष् + आननः = षडाननः

सत् + गुणः = सद्गुणः

स्वर्गात् + अपि = स्वर्गादपि

षष् + दर्शनानि = षड्दर्शनानि

तत् + अपि = तदपि

अप् + जम् = अब्जम्

जगत् + गुरुः = जगद्गुरुः

अप् + धिः = अब्धिः

महत् + इदम् = महदिदम्

अस्मात् + वचनात् = अस्माद्वचनात्　　तावत् + एनम् = तावदेनम्

प्राक् + एव = प्रागेव　　सम्यक् + अभिहितम् = सम्यगभिहितम्

[11]अमङणनान् वर्जयित्वा वर्गीयव्यञ्जनानां कर्कशव्यञ्जने (खरि) परे तत्तद्वर्गीय-प्रथमव्यञ्जनम् आदेशो भवति ।

i. | वर्गीयव्यञ्जनानि + (कर्कशव्यञ्जनानि) = क् च् ट् त् प् |

- दिग् + पालः
  दि + क् + पालः = दिक्पालः (ग् = क्)
- विराड् + पुरुषः
  विरा + ट् + पुरुषः = विराट्पुरुषः । (ड् = ट्)
- विपद् + कालः
  विप + त् + कालः = विपत्कालः । (द् = क्)
- अनुष्टुभ् + छन्दः
  अनुष्टु + प् + छन्दः = अनुष्टुप्छन्दः । (भ् = प्)

अन्यान्युदाहरणानि -

अस्मद् + पुत्रः = अस्मत्पुत्रः	विपद् + प्रतीकारः = विपत्प्रतीकारः
सम्पद् + पुत्रः = सम्पत्पुत्रः	सम्पद् + कुमारः = सम्पत्कुमारः
उद् + पतति = उत्पतति	षड् + खाद्यानि = षट्खाद्यानि
तादृग् + कर्म = तादृक्कर्म	एतद् + पार्श्वम् = एतत्पार्श्वम्
विश्वराड् + कुत्र = विश्वराट्कुत्र	कामधुग् + खादति = कामधुक्खादति
तुराषाड् + सर्वः = तुराषाट्सर्वः	ऋत्विग् + पार्श्वे = ऋत्विक्पार्श्वे
परिव्राड् + सङ्घः = परिव्राट्सङ्घः	ककुद् + स्थः = ककुत्स्थः

५. अनुनासिकसन्धिः

अनुनासिकः = ङ् ञ् ण् न् म्

[12]अनुनासिकव्यञ्जनेषु परेषु पदान्ते स्थितानां वर्गीयव्यञ्जनानां तत्तद्वर्गीयपञ्चमो वर्णो (अनुनासिकः) विकल्पेन आदेशो भवति । [13]अनुनासिकादौ प्रत्यये परे तु नित्यमेव अनुनासिको भवति ।

---

11. खरि च - ८.४.५५ खरि परे झलां चरः स्युः ।
12. यरोऽनुनासिकेऽनुनासिको वा - ८.४..४५ यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् ।
13. प्रत्यये भाषायां नित्यम् (वा) ।

i. **विकल्पेन** - | वर्गीयव्यञ्जनानि + (अनुनासिकः) = अनुनासिकः |

- वाग् + मूलम्

  वा + ङ् + मूलम् = वाङ्मूलम्/वाग्मूलम् । (ग् = ङ्)
- षड् + मयूखाः

  ष + ण् + मयूखाः = षण्मयूखाः/षड्मयूखाः । (ड् = ण्)
- तद् + नयति

  त + न् + नयति = तन्नयति/तद्नयति (द् = न्)

ii. **नित्यम्** - | वर्गीयव्यञ्जनानि + (प्रत्ययानुनासिकः) = अनुनासिकः |

- चिद् + मयम्

  चि + न् + मयम् = चिन्मयम् (त् = न्)
- तद् + मात्रम्

  त + न् + मात्रम् = तन्मात्रम् (द् = न्)
- अप् + मयम्

  अ + म् + मयम् = अम्मयम् । (प् = म्)

अन्यान्युदाहरणानि -

वाग् + नियमः = वाङ्नियमः
तद् + मङ्गलम् = तन्मङ्गलम्
तस्माद् + मद्यम् = तस्मान्मद्यम्
मद् + निवासः = मन्निवासः
तस्माद् + नागरिकाः = तस्मान्नागरिकाः
त्वग् + मोचनम् = त्वङ्मोचनम्
सम्राड् + मनसि = सम्राण्मनसि
विद्युद् + नगरी = विद्युन्नगरी
जगद् + नाथः = जगन्नाथः
षड् + मुखः = षण्मुखः
तद् + नयनम् = तन्नयनम्
यद् + मण्डलम् = यन्मण्डलम्
सकृद् + नष्टम् = सकृन्नष्टम्
जगद् + नियामकः = जगन्नियामकः
मधुलिड् + नमति = मधुलिण्नमति
दिग् + मध्ये = दिङ्मध्ये
जाग्रत् + नागरिकः = जाग्रन्नागरिकः

६. अनुस्वारसन्धिः

अनुस्वारः = ०

६.१. [14]व्यञ्जने परे पदान्ते स्थितस्य मकारस्य अनुस्वारो भवति ।

---

14. मोऽनुस्वारः - ८.३.२३ मान्तस्य पदस्य अनुस्वारः स्याद्धलि ।

* वन्दे रामं । कृष्णं अनुसरति - इत्यत्र वाक्यद्वयेऽपि अनुस्वारलेखनं न युक्तम् । उभयत्रापि अग्रे व्यञ्जनस्याभावात् । अनुस्वारसन्धौ व्यञ्जनपरकः एव मकारः अनुस्वारो भवतीति स्मरणीयम् ।

i. म् + (व्यञ्जनानि) = ं

- *रामम् + वन्दे
  राम +ं + वन्दे = रामं वन्दे । (म् = ं)
- गुहायाम् + तपति
  गुहाया + ं+ तपति = गुहायां तपति । (म् = ं)

अन्यान्युदाहरणानि -

हरिम् + श्रयते = हरिं श्रयते	वाक्यम् + शृणोतु = वाक्यं शृणोतु
मालायाम् + सूत्रम् = मालायां सूत्रम्	आपणम् + गत्वा = आपणं गत्वा
धर्मम् + चर = धर्मं चर	सत्यम् + वद = सत्यं वद
सज्जनम् + मानय = सज्जनं मानय	सर्वम् + स्थानम् = सर्वं स्थानम्
नगर्याम् + स्थित्वा = नगर्यां स्थित्वा	फलम् + खादित्वा = फलं खादित्वा
दुःखम् + त्यज = दुःखं त्यज	पापम् + शान्तम् = पापं शान्तम्
पुस्तकम् + पश्य = पुस्तकं पश्य	वाणीम् + वन्दे = वाणीं वन्दे
वीणाम् + वादयति = वीणां वादयति	एवम् + कृत्वा = एवं कृत्वा

६.२ [15]अमङणनान् वर्जयित्वा वर्गीयव्यञ्जनेषु शषसहेषु च (झलि) परेषु अपदान्ते स्थितस्य नकारस्य मकारस्य च अनुस्वारो भवति ।

i. न् + (वर्गीयव्यञ्जनम्/शषसह) = ं

- यशान् + सि
  यशा + ं + सि = यशांसि । (न् = ं)

ii. म् + (वर्गीयव्यञ्जनम्/शषसह) = ं

- आक्रम् + स्यते
  आक्र + ं + स्यते = आक्रंस्यते । (म् = ं)

७. परसवर्णसन्धिः

परसवर्णः = ङ् ञ् ण् न् म् यँ् लँ् वँ्

७.१. [16]अनुस्वारस्य वर्गीयव्यञ्जनेषु (ययि) परेषु तत्तद्वर्गस्य पञ्चमो वर्णः आदेशो भवति, यवले परे तु यँ् वँ् लँ् इत्यादेशो भवति । [17]पदान्ते स्थितस्य अनुस्वारस्य तु विकल्पेन आदेशो भवति ।

---

15. नश्चापदान्तस्य झलि - ८.३.२४ नस्य मस्य चापदान्तस्य झल्यनुस्वारः स्यात् ।
16. अनुस्वारस्य ययि परसवर्णः - ८.४.५८ अनुस्वारस्य ययि परे परसवर्णः स्यात् ।
17. वा पदान्तस्य - ८.४.५९ पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् ।

i. **नित्यम्** - | अनुस्वारः + (वर्गीयव्यञ्जनानि) = ङ ञ ण न म |

- अं + कितः
  अ + ङ् + कितः = अङ्कितः । (० = ङ्)
- मुं + चति
  मु + ञ् + चति = मुञ्चति । (० = ञ्)
- मुं + डनम्
  मु + ण् + डनम् = मुण्डनम् (०= ण्)
- नं + दति
  न + न् + दति = नन्दति (० = न्)
- कं + पते
  क + म् + पते = कम्पते । (० = म्)

ii. **विकल्पः** -

| अनुस्वारः + (वर्गीयव्यञ्जनानि/य व ल) = ङ् ञ् ण् न् म्/यँ वँ लँ |

- त्वं + करोषि
  त्व + ङ् + करोषि = त्वङ्करोषि/त्वंकरोषि (० = ङ्)
- * सं + पृक्तौ
  स + म् + पृक्तौ = सम्पृक्तौ/संपृक्तौ (० = म्)
- सं + यमः
  स + यँ + यमः = सँय्यमः/संयमः (० = यँ)
- सं + वत्सरः
  स + वँ + त्सरः = सवँवत्सरः/ संवत्सरः (० = वँ)
- सं + लापः
  स + लँ + लापः = सल्लाँपः/ संलापः (० = लँ)

अन्यान्युदाहरणानि -

अं + बरम् = अम्बरम्
इं + गितम् = इङ्गितम्
प्रें + खा = प्रेङ्खा
पं + जरम् = पञ्जरम्
कं + टकम् = कण्टकम्
मं + दिरम् = मन्दिरम्

अं + कनम् = अङ्कनम्
अं + घ्रिः = अङ्घ्रिः
चं + चूः = चञ्चूः
पिं + डम् = पिण्डम्
कुं + तः = कुन्तः
संरं + भः = संरम्भः

---

* उपसर्गः सर्वोऽपि सुबन्तः । अत तस्य पदत्वम् । तस्मात् 'संपृक्तौ' इत्यादौ विकल्पेनानुस्वारः ।

सं + भवः = सम्भवः　　　　सं + ख्या = सङ्ख्या
गृहं + गत्वा = गृहङ्गत्वा　　　　इत्थं + कृत्वा = इत्थङ्कृत्वा
शं + करः = शङ्करः　　　　सं + बं + धः = सम्बन्धः
सं + भ्रमः = सम्भ्रमः　　　　झं + झावातः = झञ्झावातः

७.२. [18]तवर्गस्य लकारे परे लकारादेशो भवति । तत्र नकारस्य अनुनासिकलँकारो भवति ।

तवर्गः + (ल्) = ल्/लँ्

- तद् + लयः
  त + ल् + लयः = तल्लयः । (द् = ल्)
- पठन् + लिखति
  पठ + लँ् + लिखति = पठल्लिँखति । (न् = ल्)

अन्यान्युदाहरणानि -

चलत् + लाङ्गलम् = चलल्लाङ्गलम्　　　　पतत् + लेखनी = पतल्लेखनी
जहत् + लक्षणा = जहल्लक्षणा　　　　गच्छन् + लक्ष्मणः = गच्छल्लँक्ष्मणः
विलसत् + लङ्काः - विलसल्लङ्का　　　　गर्जन् + लङ्केश्वरः - गर्जल्लँङ्केश्वरः
वदन् + लज्जितः - वदल्लँज्जितः　　　　जनान् + लब्ध्वा - जनाल्लँब्ध्वा
जगत् + लयः - जगल्लयः　　　　ललत् + ललन्तिका - ललल्ललन्तिका

८. [19]ङमुडागमसन्धिः　ङ मु ट् = ङ्, ण्, न्

ह्रस्वस्वरपूर्वकङान्तात् ह्रस्वस्वरपूर्वकणान्तात्, ह्रस्वस्वरपूर्वकनान्तात् च पदात् स्वरे परे, स्वरात्पूर्वं क्रमात् ङ् ण् न् इत्येते आगमाः भवन्ति । ङ् ण् न् इत्येतेषां द्विरुच्चारणं भवतीति फलितोऽर्थः ।

i. | (ह्रस्वस्वरपूर्वकाः) ङ् ण् न् + स्वराः = - ङ् - - ण् - - न् - |
|---|

- प्रत्यङ् + आत्मा
  प्रत्यङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा ।
- सुगण् + ईशः
  सुगण् + ण् + ईशः = सुगण्णीशः

---

18. तोर्लि - ८.४.६० तवर्गस्य लकारे परे परसवर्णः स्यात् ।
19. ङमोः ह्रस्वादचि ङमुण् नित्यम् - ८.३.३२ ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्य अचो नित्यं ङमुडागमः स्यात् ।

- पचन् + अस्ति

  पचन् + न् + अस्ति = पचन्नस्ति

अन्यान्युदाहरणानि -

गच्छन् + अस्ति = गच्छन्नस्ति
सर्वस्मिन् + अपि = सर्वस्मिन्नपि
तिर्यङ् + अत्र = तिर्यङ्ङत्र
स्वस्मिन् + एव = स्वस्मिन्नेव
तपस्विन् + एहि ! = तपस्विन्नेहि !
लिखन् + एव = लिखन्नेव
हसन् + अत्ति = हसन्नत्ति
शर्मन् + अधीहि = शर्मन्नधीहि

तस्मिन् + इति = तस्मिन्निति
उदङ् + इह = उदङ्ङिह
तस्मिन् + एतस्मिन् = तस्मिन्नेतस्मिन्
पूर्वस्मिन् + ईश्वरे = पूर्वस्मिन्नीश्वरे
एकस्मिन् + अम्बुजे = एकस्मिन्नम्बुजे
अपरस्मिन् + औषधे = अपरस्मिन्नौषधे
रुदन् + आयातः = रुदन्नायातः
कस्मिन् + इह = कस्मिन्निह

९. पूर्वसवर्णसन्धिः

पूर्वसवर्णः = घ् झ् ढ् ध् भ् ।

९.१. [20]तत्तद्वर्गीयतृतीयव्यञ्जनात् (जशः) परस्य हकारस्य, तत्तद्वर्गीयचतुर्थव्यञ्जनं विकल्पेन आदेशो भवति ।

i. (ग् ज् ड् द् ब्) + ह = घ / झ् / ढ् / ध् / भ्

- वणिग् + हसति

  वणिग् + घ् + असति = वणिग्घसति/वणिग्हसति ।
- अज् + हलौ

  अज् + झ् + अलौ = अज्झलौ/अज्हलौ ।
- षड् + हयाः

  षड् + ढ् + अयाः = षड्ढयाः/षड्हयाः ।
- तद् + हितम्

  तद् + ध् + इतम् = तद्धितम्/तद्हितम् ।
- अब् + ह्रदौ

  अब् + भ् + रदौ = अब्भ्रदौ/अब्ह्रदौ ।

अन्यान्युदाहरणानि -

वाग् + हीनः = वाग्घीनः
षड् + हर्म्याणि = षड्ढर्म्याणि
अब् + ह्रासः = अब्भ्रासः

प्राग् + हसित्वा = प्राग्घसित्वा
जगद् + हित = जगद्धितम्
तद् + हि = तद्धि

20. झयो होऽन्यतरस्याम् - ८.४.६२ झयः परस्य हस्य पूर्वसवर्णो वा स्यात् ।

तद् + हेतुकम् = तद्धेतुकम्
गच्छद् + हूणः = गच्छद्धूणः
महद् + हास्यम् = महद्धास्यम्
सम्राट् + हरिद्राम् = सम्राड्ढरिद्राम्
भवद् + हितरक्षकः = भवद्धितरक्षकः
सुहृद् + हृष्टः = सुहृद्धृष्टः
भ्राजद् + हिरण्यम् = भ्राजद्धिरण्यम्
विड् + हसति = विड्ढसति
पतद् + हिमम् = पतद्धिमम्

९.२. पूर्वसवर्णः = थ्

[21]उदुपसर्गात्परस्य स्थाधातोः स्तम्भधातोश्च आदौ स्थितस्य सकारस्य थकारादेशो भवति ।

(उद्) + स् = थ्

- उत् + स्थानम्
  उत् + थ् + थानम् = *उत्थ्थानम् (उत्थानम्)
- उत् + स्तम्भनम्
  उत् + थ् + तम्भनम् = *उत्थ्तम्भनम् (उत्तम्भनम्)

अन्यान्युदाहरणानि -

उत् + स्थातव्यम् = उत्थातव्यम्
उत् + स्थातुम् = उत्थातुम्
उत् + स्थानम् = उत्थानम्
उत् + स्तम्भितः = उत्थ्तम्भितः
उत् + स्थितिः = उत्थितिः
उत् + स्थापनम् = उत्थापनम्
उत् + स्थाप्य = उत्थाप्य
उत् + स्तम्भनीयः = उत्थ्तम्भनीयः

१०. छत्वसन्धिः

[22]पदान्ते स्थितात् तत्तद्वर्गीयप्रथमव्यञ्जनात्परस्य शकारस्य छकारो विकल्पेन आदेशो भवति । किन्तु शकारात्परे स्वराः यरलवमनाश्च (अम्) भवेयुः ।

i. (प्रथमव्यञ्जनम्) + श् = छ्

- वाक् + शरः
  वाक् + छ् + अरः = वाक्छरः/वाक्शरः । (श् = छ्)
- तच् + शिवः
  तच् + छ् + इवः = तच्छिवः/तच्शिवः । (श् = छ्)

21. उदः स्थास्तम्भोः पूर्वस्य - ८.४.६१ उदः परयोः स्थास्तम्भ्वोः पूर्वसवर्णः स्यात् ।
* थकारस्य विकल्पेन लोपो भवति । ४६ पृष्ठं पश्यन्तु ।
22. शश्छोऽटि - ८.४.६३ पदान्ताज्झयः परस्य शस्य छो वा स्यादटि ।

- मृच् + शकटिकम्
  मृच् + छ् + अकटिकम् = मृच्छकटिकम्/मृच्शकटिकम् ।
- मधुलिट् + शेते
  मधुलिट् + छ् + एते = मधुलिट्छेते/मधुलिट्शेते ।
- तच् + श्लोकेन
  तच् + छ् + लोकेन = तच्छ्लोकेन/तच्श्लोकेन ।
- तच् + श्मश्रु
  तच् + छ् + मश्रु = तच्छ्मश्रु/तच्श्मश्रु ।
- तच् + श्नाप्रत्ययः
  तच् + छ् + नाप्रत्ययः = तच्छ्नाप्रत्ययः/तच्श्नाप्रत्ययः ।

अन्यान्युदाहरणानि -

वाक् + शस्त्रम् = वाक्छस्त्रम् / वाक्शस्त्रम्
तत् + शुभम् = तच्छुभम् / तच्शुभम्
विट् + शङ्करः = विट्छङ्करः / विट्शङ्करः
सच् + शीलम् = सच्छीलम् / सच्शीलम्
चलच् + शुकः = चलच्छुकः / चलच्शुकः
नश्यच् + शास्त्रम् = नश्यच्छास्त्रम् / नश्यच्शास्त्रम्
विद्वच् + श्रद्धा = विद्वच्छ्रद्धा / विद्वच्श्रद्धा
तच् + श्लाघनम् = तच्छ्लाघनम् / सच्श्लाघनम्
एतच् + श्वस्तनम् = एतच्छ्वस्तनम् / एतच्श्वस्तनम्
तच् + श्मशानम् = तच्छ्मशानम् / तच्श्मशानम्

११. [23]नकारान्तात् पदात् चछयोः परयोः *नकारस्य शकारः, टठयोः परयोः षकारः, तथयोः परयोः सकारश्च आदेशो भवति, आदेशात् पूर्वत्र स्थित स्वरः अनुनासिकः अनुस्वारयुक्तो वा भवति । किन्तु एतेभ्यः चादिभ्यः परे स्वराः यरलवमनाश्च (अम्) भवेयुः ।

---

23. नश्चव्यप्रशान् - ८.३.७ अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् ।

* 'नश्चव्यप्रशान्' इति सूत्रम्, अग्रे 'समःसुटि' इति सूत्रञ्च प्राधान्येन लिखितम् । किन्तु उपर्युक्तः सर्वोऽपि न तयोः सूत्रयोरर्थः । प्रक्रियासौकर्याय अन्येषां सूत्राणामर्थोऽपि क्रोडीकृतः ।

i. **न् + (चछ) = ँश् / ंश**

- तान् + च
  ताँ + श् + च = ताँश्च /
  तां + श् + च = तांश्च ।
- एतान् + छात्रान्
  एताँ + श् + छात्रान् / = एताँश्छात्रान् /
  एतां + श् + छात्रान् / = एतांश्छात्रान् ।

ii. **न् + (टठ) = ँष् / ंष्**

- श्लोकान् + टीकाभिः
  श्लोकाँ + ष् + टीकाभिः/ = श्लोकाँष्टीकाभिः /
  श्लोकां + ष् + टीकाभिः = श्लोकांष्टीकाभिः ।
- तान् + ठक्कारान्
  ताँ + ष् + ठक्कारान् / = ताँष्ठक्कारान् /
  तां + ष् + ठक्कारान् = तांष्ठक्कारान्

iii. **न् + (तथ) = ँस् / ंस्**

- अस्मान् + तारय
  अस्माँ + स् + तारय = अस्माँस्तारय /
  अस्मां + स् + तारय = अस्मांस्तारय ।
- तान् + थूत्करोति
  ताँ + स् + थूत्करोति = ताँस्थूत्करोति /
  तां + स् + थूत्करोति = तांस्थूत्करोति ।

अपवादः - 'प्रशान्' शब्दे तु नायं नियमः । यथा - प्रशान् तनोति ।

१२. [24]समुपसर्गात् *सकारादौ कृधातौ परे मकारस्य सकारादेशो भवति, सकारादेशानन्तरं पूर्वस्थितः अकारः अनुनासिकः अनुस्वारयुक्तो वा भवति । [25]सकारादेशानन्तरं सकारस्य विकल्पेन लोपश्च भवति ।

---

24. समः सुटि - ८.३.५. समो रुः स्यात्सुटि ।

* सम्परिभ्यां करोतौ भूषणे - ६.१.१३७ सम्परिपूर्वस्य करोतेः सुट् स्यात् भूषणे सङ्घातार्थे च । संस्करोति = अलङ्करोति । संस्कुर्वन्ति = सङ्घीभवन्ति इति सिद्धान्तकौमुद्याम् । अतोऽनयोरर्थयोः कृञ्धातुः सादिर्भवति । तस्मात्संस्कृतं नाम अलङ्कृतम् इत्यर्थः ।

25. समो वा लोपमेके (भा)

i. | (स) म् + (स्कृ) = ँस् |

- सम् + स्कर्ता

  सँ + स् + स्कर्ता = सँस्स्कर्ता /

  सँ + स्कर्ता = सँस्कर्ता ।

- सम् + स्कृतम्

  सँ + स् + स्कृतम् = सँस्स्कृतम् /

  सँ + स्कृतम् = सँस्कृतम्

ii. | स म् (+स्कृ) = ंस् |

- सम् + स्कर्ता

  सं + स् + स्कर्ता = संस्स्कर्ता /

  सं + स्कर्ता = संस्कर्ता

- सम् + स्कृतम्

  सं + स् + स्कृतम् = संस्स्कृतम् /

  सं + स्कृतम् = संस्कृतम्

१३. तुगागमसन्धिः

[26]ह्रस्वात् स्वरात् छकारे परे तयोर्मध्ये *चकारागमः भवति, [27]दीर्घात्पदान्तात्तु विकल्पेन भवति ।

i. **नित्यम्** - | ह्रस्वस्वरः + छ = - च् - |

- वृक्ष + छाया

  वृक्ष + च् + छाया = वृक्षच्छाया

ii. **विकल्पेन** - | दीर्घपदान्तं + छ = - च् - |

- शिखरिणी + छन्दः

  शिखरिणी + छन्दः = शिखरिणीच्छन्दः/शिखरिणीछन्दः ।

---

26. छे च - ६.१.७३ ह्रस्वस्य छे परे तुगागमः स्यात् ।

* पाणिनिना तुगागमः (त्) विहितः । तुगागमे सति श्चुत्वं भवत्येवेति चकारागमः इति लिखितम् । तुगागमत्वेन प्रसिद्धिरस्तीति तुगागमसन्धिरिति लिखितम् ।

27. पदान्ताद्वा - ६.१.७६ दीर्घात्पदान्तात् छे परे तुग्वा स्यात् ।

अन्यान्युदाहरणानि -

संस्कृत + छात्रः = संस्कृतच्छात्रः	श्वेत + छत्रम् = श्वेतच्छत्रम्
अक्षर + छन्दसः = अक्षरच्छन्दः	कार्य + छलम् = कार्यच्छलम्
शुभ्र + छविः = शुभ्रच्छविः	गृह + छादनम् = गृहच्छादनम्
मानव + छाया = मानवच्छाया	सूक्ष्म + छिद्रम् = सूक्ष्मच्छिद्रम्
दीर्घ + छुरिका = दीर्घच्छुरिका	वृक्ष + छेदः = वृक्षच्छेदः
स + छत्रः = सच्छत्रः(छत्रसहितः)	संस्कृत + छाया = संस्कृतच्छाया
मातृ + छाया = मातृच्छाया	एतरेय + छान्दोग्ये = एतरेयच्छान्दोग्ये

पदवी + छात्राः = पदवीच्छात्राः/पदवीछात्राः

मात्रा + छन्दः = मात्राच्छन्दः/मात्राछन्दः

इमे विषयाः क्वचिदपेक्ष्यन्ते

१. यवयोर्लोपः[28]

पदान्ते विद्यमानस्य अकारपूर्वस्य आकारपूर्वस्य वा यकारस्य वकारस्य च स्वरे परे विकल्पेन लोपो भवति । लोपे कृते निमित्तस्य सद्भावेऽपि स्वरसन्धिः न भवति ।

- तस्याय् + इदम्
  तस्या + इदम् = तस्या इदम्/तस्यायिदम्
- उभाव् + अपि
  उभा + अपि = उभा अपि/उभावपि

२. केषाञ्चन व्यञ्जनानां लोपः[29]

व्यञ्जनात्परस्य ञमङणनान् वर्जयित्वा वर्गीयव्यञ्जनस्य शषस इत्येतेषाञ्च एतेष्वेव सवर्णेषु व्यञ्जनेषु परेषु लोपो विकल्पेन भवति ।

- कृष्ण + ऋद्धिः
  कृष्ण् + अर् + द्धिः = कृष्णर्द्धिः । (गुणः) (र् द् ध् इ = र्द्धि)
- कृष्ण् + अर् + धिः = कृष्णर्धिः । (लोपः) (र् (द्) ध् इ = र्धिः)

३. द्वित्वम्[30]

स्वरात्परस्य (हकारं वर्जयित्वा) व्यञ्जनस्य द्वित्वं विकल्पेन भवति । स्वरे परे तु द्वित्वं न ।

---

28. लोपः शाकल्यस्य - ८.३.१९ अवर्णपूर्वयोः पदान्तयोः यवयोः लोपो वा स्यादशिपरे ।
29. झरो झरि सवर्णे - ८.४.६५ हलः परस्य झरो लोपः स्यात् सवर्णे झरि ।

सुधी + उपास्यः

सुध्य् + उपास्यः = सुध्युपास्यः । (यण्)

सुध्ध्य् + उपास्यः = (धकारस्य द्वित्वम्)

सुद्ध्य् + उपास्यः = सुद्ध्युपास्यः । [31](जश्त्वम्)

४. जश्त्वम्[31]

ञमङणनान् वर्जयित्वा वर्गीयव्यञ्जनानां शषसह इत्येतेषाञ्च तत्तद्वर्गीयतृतीय-चतुर्थव्यञ्जने परे तत्तद्वर्गीयतृतीयव्यञ्जनमादेशो भवति ।

सुधी + उपास्यः

सुध्य् + उपास्यः (यण्)

सुध्ध्य् + उपास्यः (द्वित्वम्)

सु द् ध् य् + उपास्यः (जश्त्वम्) = सुद्ध्युपास्यः

*****

30. अनचि च - ८.४.४७ अचः परस्य यरो द्वे वा स्तः न त्वचि ।
31. झलां जश् झशि - ८.४.५३ झलां स्थाने जश् स्यात् झशि परे ।

विशेषः	पूर्ववर्णः	परवर्णः	परिणामः	पृष्ठम्
१. पूर्वस्य परस्य वा स्थाने निमित्तानुसारेण आदेशः	अ) स्तुः / श्चुः	श्चुः / स्तुः	श्चुत्वम्	३१
	आ) स्तुः / ष्टुः	ष्टुः / स्तुः	ष्टुत्वम्	३२
२. i. पूर्वस्य स्थाने आदेशः (ञमङणनान् वर्जयित्वा वर्गीयव्यञ्जनानां स्थाने)	अ) ञमङणनान् विना वर्गीयव्यञ्जनानि षकारश्च (पदान्ते)	स्वराः, मृदुव्यञ्जनानि	जश्त्वम्	३४
	आ) ञमङणनान् विना वर्गीयव्यञ्जनानि	कर्कशव्यञ्जनानि	चर्त्वम्	३६
	इ) ञमङणनान् विना वर्गीयव्यञ्जनानि	अनुनासिकव्यञ्जनानि	अनुनासिकः	३६
	ई) तवर्गः (नकारोऽपि)	लकारः	परसवर्णः (लकारः)	४०
ii. पूर्वस्य स्थाने आदेशः । (म्/न्/० इत्येतेषां स्थाने)	अ) पदान्ते मकारः	व्यञ्जनम्	अनुस्वारः	३७
	आ) मकारः / नकारः	ञमङणनान् विना वर्गीयव्यञ्जनानि, श्ष्स्ह्	अनुस्वारः	३८
	इ) अनुस्वारः (०)	शषसहान् विना व्यञ्जनानि	परसवर्णः (ङ्ञ्ण्न्म्यँलँवँ)	३८
३. परस्य (ह् / श् / स्)	i. वर्गीयतृतीयव्यञ्जनानि	ह्	पूर्वसवर्णः (घ् /झ् /ढ् /ध् /भ्)	४१
	ii. वर्गीयप्रथमव्यञ्जनानि	श्	छत्वम्	४२
	उद्	स्था/स्तम्भ्	थकारः	४२
४. आगमः -	i. पदान्ते ह्रस्वस्वरपूर्वकाः ङणनाः	स्वराः	ङमुडागमः	४०
	ii. स्वराः	छकारः	चकारागमः	४५
५.	पदान्ते नकारः	चछ / टठ / तथ	ँश्/ ंश्, ँष्/ ंष्, ँस्/ ंस	४४
	सम्	स्कृ	ँस् / ०स्	४५

१. श्चुत्वसन्धौ ष्टुत्वसन्धौ च पूर्वस्य परस्य वा स्थाने आदेशस्य सम्भवोऽस्ति । (३१ तमे पृष्ठे तृतीयां टिप्पणीं पश्यन्तु ।)

२. अत्र विभागद्वयम् -

i. प्रथमभागे पूर्वत्र वर्गीयव्यञ्जनानामेव प्रसक्तिः । परत्र स्वराः मृदुव्यञ्जनानि (अश्) भवन्ति चेत् जश्त्वं, कर्कशव्यञ्जनानि (खर्) चेत् चर्त्वं, ञमङणनाः (ञम्) चेद् अनुनासिकः, (तवर्गात् लकारे लकारः) च पूर्वस्य स्थाने आदेशो भवति ।

ii. द्वितीयभागे पूर्वत्र 'म्, न्, ं' इत्येतेषामेव प्रसक्तिः । परत्र तु उपर्युक्तक्रमेण व्यञ्जनानां श्रवणे अनुस्वारः परसवर्णो वा भवति ।

३. i. पूर्वत्र जश्त्वसन्धिः आदावेव प्रवर्तते । परत्र हकारस्यैव श्रवणम् । पूर्वत्र यदि ग् ज् ड् द् ब् इति श्रूयते, तदा क्रमशः हकारस्य घ्, झ्, ढ्, ध्, भ् इत्येते आदेशाः विकल्पेन भवन्ति ।

ii. पूर्वत्र चर्त्वसन्धिः आदावेव प्रवर्तते । परत्र शकारस्यैव श्रवणम् । तस्य छकारादेशः विकल्पेन भवति । एवञ्च जश्त्वानन्तरं परत्र हकारस्य श्रवणं, चर्त्वानन्तरं परत्र शकारस्य श्रवणं च यदि भवति तर्हि अनयोः प्रसक्तिरिति फलितम् ।

४. i. ङ् ण् न् इत्येतेषां द्विरुच्चारणं भवतीति फलति । नकारान्तस्यैव (गच्छन्, कुर्वन्...) प्राचुर्येण प्रयोगो विद्यते । ङान्तस्य णान्तस्य च विरलः प्रयोगः ।

ii. ह्रस्वस्वर-छकारयोर्मध्ये नित्यं चकारस्य श्रवणं, दीर्घपदान्त-छकारयोर्मध्ये तु विकल्पेन इति विवेकः ।

स्वरसन्धिसङ्ग्रहः

- पूर्वत्र परत्र च यथासङ्ग्रहम् अकः (अआ, इई, उऊ, ऋॠ) श्रवणम् अस्ति चेत् सवर्णदीर्घः ।
- पूर्वत्र अकारस्य आकारस्य च श्रवणे, परत्र इकः (इ, उ, ऋ) श्रवणे गुणः । एचः (ए, ऐ, ओ, औ) श्रवणे वृद्धिः ।
- पूर्वत्र इकः (इ, उ, ऋ, ऌ) श्रवणे, परत्र असवर्णस्वरश्रवणे यण् ।
- पूर्वत्र एचः (ए, ऐ, ओ, औ) श्रवणे, परत्र स्वरश्रवणे च (पूर्वरूपस्थलं विना) यान्तवान्तादेशः ।
- पूर्वत्र पदान्ते एङः (ए, ओ) श्रवणे, परत्र ह्रस्वस्य अकारस्य श्रवणे पूर्वरूपम् ।
- पदान्ते अकः (अ, इ, उ, ऋ, ऌ) श्रवणे, परत्र ऋकारस्य श्रवणे प्रकृतिभावः । पूर्वत्र प्लुतस्य श्रवणे, प्रगृह्यस्य सद्भावे वा चापि प्रकृतिभावः ।

(सङ्ग्रहेऽस्मिन् विशेषनियमाः अपवादाश्च न उक्ताः ।)

५. विसर्गसन्धिः

विसर्गसन्धौ पाणिनीयसूत्राणाम् अनुसरणेन अस्ति कश्चन क्लेशः । यथा - 'कवर्गे पवर्गे च परे जिह्वामूलीयपोपध्मानीयौ भवतः, विसर्गो वा' इति 'कुप्वोः ⨯क ⨯पौ च ८.३.३८' इति सूत्रेण विधीयते । यथा - बाल⨯ करोति । बालः करोति । वृक्ष⨯ फलानि । वृक्षः फलानि । इति । किन्तु बालो गच्छति, प्रथमो भागः इत्यादौ गकारे भकारे च परे 'कुप्वोः ⨯क⨯पौ च' इत्यस्य कुतो न प्रवृत्तिः ? इत्येतादृशाः संशयाः विसर्गसन्धौ बहुषु स्थलेषु समुद्भवन्ति । एतादृशान् संशयान् अपाकर्तुम् असिद्धत्वं परिशीलनीयं, बहूनां सूत्राणाम् अर्थानां तात्पर्यं हृद्गतं च कर्तव्यं भवति । अतः अत्र बहूनां सूत्राणाम् अर्थाः सङ्गृह्य लिखिताः । अत एव विसर्गसन्धिसम्बन्धीनि सूत्राणि टिप्पण्यां न उद्धृतानि ।

१. सकारः

[1] कखपफान् वर्जयित्वा कर्कशव्यञ्जने (खरि) परे विसर्गस्य सकारादेशो भवति, शषस इत्येतेषु परेषु तु विकल्पेन सकारो भवति ।

i.	विसर्गः + (कर्कशव्यञ्जनानि) = स्

- बालः + तत्र
  बाल + स् + तत्र = बालस्तत्र । (: = स्)
- रामः + च
  राम + स् + च = (रामस्च) रामश्च* । (: = स्)
- कृष्णः + छात्रः
  कृष्ण + स् + छात्रः = (कृष्णस्छात्रः) कृष्णश्छात्रः* । (: = स्)
- डयमानः + टिट्टिभः
  डयमान + स् + टिट्टिभः = (डयमानस्टिट्टिभः) डयमानष्टिट्टिभः* । (: = स्)

---

* इदमवधेयम् - चछश इत्येतेषु परेषु श्चुत्वसन्धिः, टठष इत्येतेषु परेषु ष्टुत्वसन्धिश्च सकारादेशानन्तरं भवति ।

1. इममेव नियमम् एवं वा वक्तुं शक्यते - विसर्गस्य तथयोः परयोः सकारः, चछयोः परयोः शकारः, टठयोः परयोः षकारः, शषस इत्येतेषु परेषु विकल्पेन क्रमात् शषसा एव आदेशा भवन्ति ।

ii. विसर्गः + (शषस) – स्/ः

- पयः + शीतलम्

  पय + स् + शीतलम् = (पयस् शीतलम्) *पयश्शीतलम्/

  पयःशीतलम् । (ः – स्)

- श्रीधरः + षष्ठः

  श्रीधर + स् + षष्ठः = (श्रीधरस्षष्ठः) *श्रीधरष्षष्ठः/श्रीधरःषष्ठः

- भक्तः + सेवते

  भक्त + स् + सेवते = भक्तस्सेवते/भक्तःसेवते ।

२. जिह्वामूलीयः उपध्मानीयश्च

'क ख' इत्येतयोः परयोः (⨯) जिह्वामूलीयः, 'प फ' इत्येतयोः परयोः (⨯) उपध्मानीयश्च विसर्गस्य स्थाने विकल्पेन भवति ।

i. | ः + क / ख – ⨯ |
|---|

- बालः + करोति

  बाल ⨯ + करोति = बाल ⨯ करोति / बालः करोति

- तरुणः + खनति

  तरुण ⨯ + खनति – तरुण ⨯ खनति / तरुणः खनति ।

ii. | ः + प / फ = ⨯ |
|---|

- कृष्णः + पिबति

  कृष्ण ⨯ + पिबति – कृष्ण ⨯ पिबति / कृष्णः पिबति ।

- वृक्षः + फलति

  वृक्ष ⨯ + फलति – वृक्ष ⨯ फलति / वृक्षः फलति ।

इदमवधेयम्

१. 'क्ष, प्स, त्स' इत्येतेषु परेषु विसर्ग एव श्रूयते । न जिह्वामूलीयोपध्मानीयौ, न वा सकारः । दशरथः क्षत्रियः । अद्भिः प्सातम् । कः त्सरुः । (त्सरुः = खड्गमुष्टिः)

२. नमस्करोति । नमः करोति । नम ⨯ करोति - इति त्रिधा प्रयोगः ।

   'पुरस्करोति' अत्र सकार एव ।

३. एतन्नियमानन्तर्भूताः केचन सन्ति । यथा - आविष्कृतम्, निष्प्रत्यूहम्, दुष्कृतम्, सर्पिष्कुण्डिका, अयस्कारः, अयस्कुम्भः, अयस्पात्रम्, अहरहः इत्यादयः । एते च सिद्धान्तकौमुदीतः ज्ञेयाः ।

३. रेफः

'अ आ' इत्येतौ वर्जयित्वा स्वरात् (इचः) परस्य विसर्गस्य स्वरे मृदुव्यञ्जने च (अशि) परे रेफादेशो भवति । अव्ययसम्बन्धिनः ऋकारान्तशब्दस्य सम्बोधनसम्बन्धिनश्च विसर्गस्य अकारात् आकारात् परस्यापि रेफादेशो भवति ।[2]

i. | (अ आ इत्येतौ विना स्वराः) + ः + (स्वराः/मृदुव्यञ्जनानि) = र् |

- मुनिः + इति
  मुनि + र् + इति = मुनिरिति (ः = र्)
- भानुः + असौ
  भानु + र् + असौ = भानुरसौ
- तैः + आगतम्
  तै + र् + आगतम् = तैरागतम्
- धेनुः + गच्छति
  धेनु + र् + गच्छति = धेनुर्गच्छति
- एतैः + भक्षितम्
  एतै + र् + भक्षितम् = एतैर्भक्षितम्

ii. | अव्ययसम्बन्धी विसर्गः + (स्वराः/मृदुव्यञ्जनानि) = र् |

- पुनः + अत्र
  पुन + र् + अत्र = [3]पुनरत्र ।
- प्रातः + गच्छति
  प्रात + र् + गच्छति = प्रातर्गच्छति ।

iii. ऋकारान्तशब्दस्य सम्बोधनसम्बन्धी विसर्गः + (स्वराः + मृदुव्यञ्जनानि) = र्

- पितः + वन्दे
  पित + र् + वन्दे = [3]पितर्वन्दे

४. लोपः

४.१. आकारात्परस्य विसर्गस्य स्वरे मृदुव्यञ्जने च परे (अशि) लोपो भवति ।

| (आ) + ः + (स्वराः/मृदुव्यञ्जनानि) = लोपः |

- बालाः + अत्र

---

2. ससजुषो रुः - ८. २. ६६ इति विहितस्य रुकारस्यैव उत्वं भवति, नान्यस्य इति स्मर्तव्यम् ।
3. विसर्गसन्धेः चतुर्थेन नियमेन अत्र उकारो न भवतीति स्मरणीयम् ।

बाला + अत्र = [4]बालाअत्र ।

- लताः + एधन्ते

  लता + एधन्ते = लता [4]एधन्ते ।

- ताः + गच्छन्ति

  ता + गच्छन्ति = ता गच्छन्ति ।

- वृद्धाः + यान्ति

  वृद्धा + यान्ति = वृद्धा यान्ति ।

४.२. अकारात्परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे लोपो भवति ।

(अ) + ः + (अकारं विना स्वराः) = लोपः

- रामः + आगच्छति

  राम + आगच्छति = [4]राम आगच्छति

- कृष्णः + एति

  कृष्ण + एति = कृष्ण [4]एति

४.३. 'एषः', 'सः' इत्यनयोः पदयोर्विसर्गस्य अकारं विना यत्किञ्चिद्वर्णे परेऽपि लोपो भवति ।

- एषः + [4]इच्छति

  एष + इच्छति = एष इच्छति ।

- एषः + गच्छति

  एष + गच्छति = एष गच्छति ।

- सः + आगच्छति

  स + आगच्छति = स[4] आगच्छति ।

- सः + तत्र

  स + तत्र = स तत्र ।

४.४. अकारं वर्जयित्वा स्वरात्परस्य विसर्गस्य रेफे परे लोपो भवति । लोपे कृते पूर्वस्वरः दीर्घः च भवति । अव्ययसम्बन्धिनः विसर्गस्य अकात्परस्यापि लोपो भवति ।

---

4. स्वरे परे विसर्गस्य विकल्पेन यकारोऽपि भवति । यथा - बालाय् अत्र । लताय् एधन्ते । रामयागच्छति । कृष्णयेति । एषयिच्छति । सयागच्छति इति । किन्तु यकारोपेतस्य प्रयोगः विरलः ।

i. | अकारं विना स्वरः + ः (+ र्) = लोपः, पूर्वस्य दीर्घः |

- कविः + रचयति ।
  कवि + रचयति → (लोपः)
  कवी + रचयति = कवी रचयति
- भानुः + राजते
  भानु + राजते → (लोपः)
  भानू + राजते = भानू राजते

ii. पुनः + रमते
  पुन + रमते (लोपः)
  पुना रमते = पुना रमते

इदमवधेयम् – विसर्गलोपे कृते निमित्तस्य सद्भावेऽपि स्वरसन्धिः न कर्तव्यः ।

५. उकारः

अकारात्परस्य विसर्गस्य अकारे मृदुव्यञ्जने च (हशि) परे उकारो भवति । उकारे कृते गुणसन्धिरवश्यं करणीयः । अकारे परे गुणानन्तरं पूर्वरूपसन्धिः अपि कर्तव्यः ।

| (अ) + ः + (अ/मृदुव्यञ्जनानि) = उकारः |

- रामः + अपि
  राम + उ + अपि (ः = उ)
  रामो + अपि (गुणः)
  राम् + ओ + पि = रामोऽपि । (पूर्वरूपम्)
- बालः + हसति
  बाल + उ + हसति (ः = उ)
  बालो + हसति = बालो हसति । (गुणः)

इदमवधेयम् - निमित्तस्य सद्भावेऽपि अव्ययसम्बन्धिनः ऋकारान्तशब्दस्य सम्बोधनसम्बन्धिनः च विसर्गस्य उकारो न भवति । यथा – पुनरत्र । प्रातर्गच्छति । हे पितरत्र ! हे होतर्गच्छ ।

अन्यान्युदाहरणानि -

भूमिः + तोयम् = भूमिस्तोयम्
ततः + ततः = ततस्ततः

तैः + अपि = तैरपि

पितुः + इच्छा = पितुरिच्छा

गुरोः + भाषणम् = गुरोर्भाषणम्

हरिः + अवदत् = हरिरवदत्

कपिः + अपि = कपिरपि

कः + चित् = कश्चित्

बालाः + धावन्ति = बाला धावन्ति

देवाः + आगच्छन्ति = देवा आगच्छन्ति

कः + इदानीम् = क इदानीम्

शिवः + वन्द्यः = शिवो वन्द्यः

गजः + गच्छति = गजो गच्छति

बालः + हसति = बालो हसति

रामः + जयति = रामो जयति

गुरुः + त्राता = गुरुस्त्राता

सः + खादति = स खादति

एषः + आसीत् = एष आसीत्

सः + अब्रवीत् = सोऽब्रवीत्

बालः + तिष्ठति = बालस्तिष्ठति

हे मातः + आगच्छ = मातरागच्छ

हे भ्रातः + गच्छ = भ्रातर्गच्छ

*****

इदमत्र ज्ञातव्यम्

(अ) बोधनक्रमः इत्थम्

यद्यपि विसर्गः विविधानि रूपाणि सृजति*, तथापि प्राचुर्येण श्रवणपथमारूढानि आरुह्यमाणानि आरोक्ष्यमाणानि च एतानि सन्ति -

१. गुरुस्तत्र । (गुरुश्च । गुरुष्षष्ठः ।)	१. सकारः
२. बालः करोति । बाल ⨯ करोति ।	२. विसर्गः, जिह्वामूलीयः
३. बालः पिबति । बाल ⨯ पिबति ।	३. विसर्गः, उपध्मानीयः
४. हरिरत्र ।	४. रेफः
५. बाला अत्र ।	५. लोपः
६. बाल इच्छति ।	६. लोपः
७. बालोऽस्ति । बालो हसति ।	७. उत्वम्

एते अंशाः अनेन क्रमेण बोधनीयाः । तथाहि -

१ - ३. विसर्जनीयस्य सः खरि, कखपफे तु विसर्गः, जिह्वामूलीयोपध्मानीयौ च ।

४. इचः परस्य रेफोऽखरि ।

५. आतः परस्य लोपोऽखरि ।

६. अतः परस्य लोप आचि ।

७. अतः परस्य अति, हशि च उत्वम् ।
(विसर्जनीयस्येति सर्वत्रानुवर्तते)

विवरणम् -

१. विसर्गात् परः यदि खर् (कर्कशव्यञ्जनम्) वर्णः (कखपफं वर्जयित्वा) श्रूयते, तर्हि विसर्गस्य स्थाने सकारः प्रवर्तते । विसर्गात् पूर्वं किमस्तीति परिशीलनं नावश्यकम् ।
[सकारादेशानन्तरं यदि श्चुत्वस्य (च् छ् श् इत्येतेषु परेषु) ष्टुत्वस्य (ट ठ् ष् इत्येतेषु परेषु) अवसरः, तदा श्चुत्वं ष्टुत्वं च कार्यम् ।]

२+३. विसर्गात्परौ यदि कखौ तदा जिह्वामूलीयः, यदि पफौ उपध्मानीयः च विकल्पेन विसर्गस्य स्थाने भवतः । जिह्वामूलीयस्य उपध्मानीयस्य चाभावे विसर्गस्यैव श्रवणम् ।

४+५. विसर्गात्परो यदि खर्वर्णः (कर्कशव्यञ्जनम्) न भवति, तद्भिन्नः यः कोऽपि वर्णः भवतु नाम, तदा विसर्गात्पूर्वं किमस्तीति परिशीलनीयम् । यदि इच्

---

* विसर्गस्य विविधरूपप्राप्तिः ५८ तमे पृष्टे विशदीकृता ।

(अकारम् आकारं च वर्जयित्वा सर्वेऽपि स्वराः) वर्णो भवति तर्हि विसर्गस्य रेफः । यदि इच् नास्ति आकारोऽस्ति (न तु अकारः) तर्हि विसर्गस्य लोपः ।

६. विसर्गात्परः खर्वर्णो नास्ति, पूर्वम् इच् नास्ति, नापि आकारः, तदा अकारः पूर्वं भवतीति सिद्धम् । तदा पुनः परवर्णः क इति परिशीलनीयम् । यदि अकारं वर्जयित्वा स्वरः (आच् इत्येष प्रत्याहारः पाणिनिना न कृतः ।) भवति तदा अपि विसर्गस्य लोपः ।

७. विसर्गात्पूर्वः परश्च ह्रस्वः अकारः, परः हश्वर्णो वा (अ + मृदुव्यञ्जनम्) भवति, तर्हि विसर्गस्य उकारो भवति । (ततो गुणः । अकारे परे तु पूर्वरूपमपि भवति ।)

अपवादाः -

i. यदि विसर्गः अव्ययसम्बन्धी, ऋकारान्तशब्दस्य सम्बोधनसम्बन्धी वा स्यात् तर्हि अशि परे रेफः, खरि परे सकारः । यथा - पुनरत्र । पुनस्तत्र । हे पितरत्र । हे होतर्यज ।

ii. 'एष' इत्यस्मात्परस्य 'स' इत्यस्मात्परस्य च हलि परे विसर्गस्य लोपः । यथा - एष विष्णुः । स शम्भुः ।

iii. आचः परस्य विसर्गस्य रेफे परेऽपि लोपः, अव्ययसम्बन्धिनः ऋकारान्तशब्दस्य सम्बोधनसम्बन्धिनः च विसर्गस्य तु अकारात्परस्यापि लोपः । लोपे कृते दीर्घश्च । यथा - कवी राजते / पुना रमते । हे दाता राजसे त्वम् ।

एष सङ्ग्रहः

१. **सकारादेशः** : + खर् = स् । गुरुस्तत्र

२+३. **विसर्गः, जिह्वामूलीयः, उपध्मानीयश्च** : + क ख प फ = :/ᳵक । ᳵप ।

बालः करोति । बालᳵ करोति । बालः पिबति । ᳵबाल पिबति ।

४. **रेफादेशः** इच् + : + अश् = र् । हरिरत्र । हरिर्गच्छति ।

५. **लोपः** आ + : + अश् = लोपः । बाला अत्र । बाला हसन्ति ।

६. **लोपः** अ + : + आच् = लोपः । बाल आगच्छति । बाल उत्सहते ।

७. **उकारादेशः** अ + : + अ/हश् = उ । बालोऽत्र । बालो गच्छति ।

एवञ्च विसर्गात्परो यदि खर्वर्णो (कर्कशव्यञ्जनम्) न भवति, (तद्भिन्नः वर्णः भवेदेव) पूर्वश्च इच् वर्णो भवति तर्हि रेफः । यदि इच् न भवति तदा अकारो वा आकारो वा भवेदेव । तदा सावधानेन मनसा लोपो वा उकारो वा इति निश्चेतव्यम् ।

(आ) पाणिनेः क्रमः

विसर्गसन्धौ पाणिनेः क्रमः इत्थं विद्यते । यथा -

१. ससजुषोरुः - ८.२.६६
२. रो रि - ८.३.१४
३. भो भगोऽघोऽपूर्वस्य योऽशि - ८.३.१७
४. लोपः शाकल्यस्य - ८.३.१९ हलि सर्वेषाम् - ८.३.२२
५. व्योर्लघुप्रयत्नतरः शाकटायनस्य - ८.३.१८
६. अतो रोरप्लुतादप्लुते - ६.१.११३, हशि च - ६.१.११४
७. खरवसानयोर्विसर्जनीयः - ८.३.१५
८. स्तोश्चुना श्चुः - ८.४.४०
९. ष्टुना ष्टुः - ८.४.४१
१०. विसर्जनीयस्य सः - ८.३.३४
११,१२. कुप्वो ᳵक ᳵपौ च - ८.३.३७
१३. खर्परे शरि वा विसर्गलोपो वक्तव्यः (वा)

* एतत्तदोः सुलोपोऽकोरनञ्समासे हलि - ६.१.१३२ इति सूत्रेण सुप्रत्ययस्यापि लोपः कृतः । किन्तु 'एष' इत्यस्मात् 'स' इत्यस्मात् परस्यैव सुप्रत्ययस्य लोपः । यथा - एष विष्णुः । स शम्भुः इति ।

(इ) विसर्गस्य परिणामाः

इमानि वाक्यानि परिशील्यन्ताम् -

पदविभागः कृतः	*सन्धिकार्यं कृतम्*	*विसर्गः इत्थं रूपेण परिणतः*
1. देवाः इह	1. देवाय् इह	1. य्
2. भोः अच्युत	2. भोय् अच्युत	2. य् (लघुप्रयत्नतरः)
3 कविः इच्छति	3. कविरिच्छति	3. र्
4. बालः च	4. बालश्च	4. श्
5. शिवसुतः षण्मुखः	5. शिवसुतष्षण्मुखः	5. ष्
6. छात्रः तिष्ठति	6. छात्रस्तिष्ठति	6. स्
7. बालः अस्ति	7. बालोऽस्ति	7. ओ
8. छात्रः करोति	8. छात्र ⨯ करोति	8. ⨯ क
9. वृक्षः फलति	9. वृक्ष ⨯ फलति	9. ⨯ फ
10. बालः इच्छति	10. बालः इच्छति	10. - (लोपः)
11. रघुः क्षत्रियः	11. रघुः क्षत्रियः	11. ः

इत्थं विसर्गः आत्मानम् एकादशधा प्रकाशयति । एतेषामपि क्वचित् क्वचित् वैकल्पिकत्वात् संहितायां विवक्षितायां वाक्यानि अधिकत्रिंशानि भवन्ति । यथा - (अत्र उत्सर्गसूत्राणाम् उदाहरणानि दर्शितानि । एतत्तदोः सुलोपो अकोरनञ्समासे हलि - ६.१.१३२, अतः कृकमि... ८.३.४६ इत्यादीनां विशेषसूत्राणाम् उदाहरणानि न प्रदर्शितानि ।)

१. बालाय् अत्र
२. बाला अत्र
३. बालाय् अत्र (ल. प्र.)
४. बाला गच्छन्ति
५. बालोऽस्ति
६. बालय् इच्छति
७. बाल इच्छति
८. बालय् इच्छति (ल. प्र.)
९. बालो गच्छति
१०. कविरिच्छति
११. कवी राजेते
१२. हरिश्च

१३. शिवसुतष्टीकते
१४. छात्रस्तिष्ठति
१५. गुरु × कारयति
१६. गुरुः कारयति
१७. शिष्य × पठति
१८. शिष्यः पठति
१९. रघुः क्षत्रियः
२०. हरिः शेते
२१. हरिश्शेते
२२. गुरुः षष्ठः
२३. गुरुष्षष्ठः

२४. शिशुः सरति
२५. शिशुस्सरति
२६. पयः श्च्योतति
२७. पयश्श्च्योतति
२८. पयश्च्योतति
२९. मूलधातुः ष्ठा इति
३०. मूलधातुष्ष्ठा इति
३१. मूलधातु ष्ठा इति
३२. बालः स्थाता
३३. बालस्स्थाता
३४. बालस्थाता

प्रथमवाक्यतः एकादशवाक्यान्तं स्वरे मृदुव्यञ्जने च (अशि) परे सन्धिकार्यं कृतम् ।
द्वादशवाक्यतः चतुस्त्रिंशत्तमवाक्यान्तं कर्कशव्यञ्जने (खरि) परे सन्धिकार्यं कृतम् ।

१, ६. भो भगोऽघोऽपूर्वस्य योशि - ८.३.१७
२, ७. लोपः शाकल्यस्य - ८.३.१९
३, ८. व्योर्लघुप्रयत्नतरः शाकटायनस्य - ८.३.१८
४. हलि सर्वेषाम् - ८.३.२२
५. अतो रोरप्लुतादप्लुते - ६.१.११३
९. हशि च - ६.१.११४
१०. ससजुषो रुः - ८.२.६६
११. रो रि - ८.३.१४
१२. विसर्जनीयस्य सः - ८.३.३४ स्तोश्चुना श्चुः - ८.४.४०
१३. विसर्गनीयस्य सः - ८.३.३४ ष्टुना ष्टुः - ८.४.४१
१४. विसर्जनीयस्य सः - ८.३.३४
१५,१६,१७,१८ कुप्वोः × क × पौ च - ८.३.३७
१९. शर्परे विसर्जनीयः - ८.३.३५
२०,२२,२४. वा शरि - ८.३.३६
२१,२३,२५. विसर्जनीयस्य सः । श्चुत्वं, ष्टुत्वम् ।
२६,२९,३२. वा शरि - ८.३.३६
२७,३०,३३. विसर्जनीयस्य सः । श्चुत्वम् । ष्टुत्वम् ।
२८,३१,३४. खर्परे शरि वा विसर्गलोपो वक्तव्यः ।

अस्मत्समीपे उपलभ्यानि

- व्यवहारसाहस्त्री (कन्नड/आंग्ल/हिन्दी-आवृत्तिः), अभ्यासपुस्तकम्, विभक्तिवल्लरी, शतृशानजन्तमञ्जरी, अभ्यासदर्शिनी, सम्भाषणसोपानम्, कालबोधिनी, णत्वणिजन्तम्, सन्देशसंस्कृतम्, गुणनकोष्टकम्, संस्कृत-सुलेखावली, बालकेन्द्रम्, सन्धिः, समासः, कारकम्, बालतोषिणी, ललितबोधिनी, शुद्धिकौमुदी, कौशलबोधिनी, भाषापाकः इत्यादीनि **शैक्षणिकपुस्तकानि** ।
- कन्नडसंस्कृतकोषः, हिन्दीसंस्कृतकोषः, आंग्लसंस्कृतकोषः, कन्नड-संस्कृतक्रियापदकोषः, संस्कृतचित्रपदकोषः इत्यादयः **शब्दकोषाः** ।
- नवरूपकम्, जागरूको भव, कविकोपकलापः इत्यादयः **रूपकसङ्ग्रहाः** ।
- गीतसंस्कृतम्, गेयसंस्कृतम्, शिशुसंस्कृतम् इत्यादीनि **गीतपुस्तकानि** ।
- सुगन्धः, पञ्चतन्त्रकथाः, शृण्वन्तु कथामेकाम् इत्यादयः **कथासङ्ग्रहाः** ।
- सुभाषितरसः, संस्कारसुधा, बाळदीविगे, मातुचेतन, मित्राय नमः इत्यादीनि **संस्कारदायकानि पुस्तकानि** । (कन्नडभाषया)
- धर्मश्रीः, सार्थः, अपश्चिमः पश्चिमे, ऋणविमुक्तिः, बाबासाहेब-आप्टे (व्यक्तिपरिचयः), भुवमानीता भगवद्भाषा इत्यादयः **दीर्घकथाग्रन्थाः** ।
- सङ्क्रमणम्, ज्ञाने धर्मः उत प्रयोगे, इदमित्थम्, ज्ञानदीप्तिः, परिवर्तनम्, पूर्णाङ्कं प्रति, संस्कृतभारती, उत्तिष्ठत मा स्वप्त, सप्तदशी, परिष्कारः इत्यादयः **वैचारिककृतयः** ।
- रसायनशास्त्रम्, भौतशास्त्रम्, आयुर्वेदः इत्यादीन् विषयान् अवलम्ब्य (आंग्लभाषया) ('भारतीयविज्ञानपरम्परा' इत्येषः तु संस्कृतेन) रचिताः **लघुग्रन्थाः** ।
- सम्भाषणसंस्कृतम्, गीतसंस्कृतम्, शिशुसंस्कृतम्, हितोपदेशकथाः, प्रयोगः, श्रीकृष्णजननम्, संस्कृतोज्जीवनम्, गेयसंस्कृतम्, अमरकोषः (समग्रः) इत्यादयः **ध्वनिमुद्रिकाः** ।
- स्वतन्त्रतया संस्कृताभ्यासार्थं **सान्द्रमुद्रिका** । (C.D.Rom) एतदतिरिच्य विविधानि संश्लेषकाणि, शुभाशयपत्राणि, भाषाभ्यासाय सज्जीकृतानि वैज्ञानिकांशयुक्तानि च भित्तिपत्राणि इत्यादीनि ।

रू. १५/-

ISBN 81-88220-19-1